
प्रकाशन प्रत्येक माह की 1 तारीख
ISSN 2249-698X

# भारती
## संस्कृत-मासपत्रिका

एकस्याः प्रतेः २५/-
वार्षिक-शुल्कम्
२५०/-
पञ्चवार्षिकशुल्कम्
११००/-
पञ्चदशवार्षिकशुल्कम्
३१००/-

वर्षम् 75, अङ्कः -8, ज्येष्ठमासः, विक्रमाब्दः 2082, युगाब्दः 5127, जून, 2025



# विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | सिन्दूरमूल्यं कियत् | प्रो.ताराशंकरशर्मा पाण्डेयः | ६ |
| ३ | पहलग्रामातंकः | डॉ. रामनारायणझाः | ८ |
| ४ | पृथुवंशम् | कविसार्वभौम अभिराजराजेन्द्रमिश्रः | ११ |
| ५ | स्वतन्त्रतायास्तात्पर्यम् | डॉ. महेशचन्द्रशर्मा गौतमः | १४ |
| ६ | गङ्गा परा देवता -३ | डॉ. गौतमपटेलः | १७ |
| ७ | उत्थापयतु जनार्दन! चक्रम् | डॉ. प्रीतिः आर. पुजारा | १८ |
| ८ | बालकाव्यानि | डॉ. हर्षदेवमाधवः | १९ |
| ९ | स्वातन्त्र्योत्तरश्रीहरिश्रेष्ठमहाकाव्यस्य ....... | अर्चना शुक्ला | २३ |
| १० | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | २७ |
| ११ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३० |


लेखकेभ्यो निवेदनम् - कृपया स्वलेखान् 'चाणक्य Font' द्वारा टंकयित्वा अशुद्धिसंशोधनं च कृत्वा 'PDF' एवं 'Word' द्वारा प्रेषयन्तु।
ग्राहकेभ्यो निवेदनम् - किसी मास का अंक दिनाङ्क 10 तक प्राप्त न हुआ हो तो कृपया Whatsapp द्वारा चलदूरभाष सं. 93520 30291, 8005813613 ( व्यवस्थापक ) पर अपने नाम, पते सहित सूचना करें।

## पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

दूरभाषः 0141-2379014, मो. 9799011085

(धनादेश/चैक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रबन्ध सम्पादक)

ISSN2249-698X

॥ श्रीशः ॥

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठम्, सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
श्रीमज्जगद्गुरुद्वाराचार्यौ अग्रपीठाधीश्वरो मलूकपीठाधीश्वरश्च
स्वामी श्रीराजेन्द्रदासमहाराजः
( अग्रपीठम्, रेवासा )
महन्तः प्रतापपुरी
( तारातरामठम्, बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर बनवारीलालगौडः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूका:

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

केन्द्रीय संस्कृत विश्वविद्यालय ( शिक्षा मंत्रालय, भारत सरकार के अधीन ) के द्वारा संस्कृत पुस्तकों के प्रकाशनार्थ वित्तीय सहायता की योजना के तहत प्रदत्त वित्तीय सहायता से प्रकाशित।

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाइट : www.bhartipatrika.org

वर्षम् 75 अङ्कः -8
ज्येष्ठमासः
विक्रमाब्दः 2082
युगाब्दः 5127
जून, 2025

एकस्याः प्रतेः 25/-
वार्षिकशुल्कम् 250/-
पञ्चवार्षिकशुल्कम् 1100/-
आजीवनसदस्यताशुल्कम् 3100/- ( 15 वर्षाणि )

सम्पादकीयम्

# सैनिक-कार्यवाहीयं सिन्दूराख्या विलक्षणा

...✍ प्रोफेसर श्रीकृष्णशर्मा

**सुमङ्गलीरियं वधूरिमां समेत पश्यत।**
**सौभाग्यमस्यै दत्त्वायाथास्तं वि परेतन।।**

इत्यादि वैदिकमन्त्रोच्चारणपूर्वकं पाणिग्रहण-वेलायां विवाहे वरो वधूस्वरूपकन्यायाः ललाटे सौभाग्यसूचकं '**सिन्दूरम्**'[१] संयोजयति। ततः प्रभृति वधूः प्रतिदिनं सौभाग्यरक्षायै 'सिन्दूरं' ललाटे धारयति। 22.04.2025 दिनाङ्के पाक-प्रायोजितैरातङ्किभिः 'पहलगाम' स्थाने षड्विंशति-संख्याक-हिन्दूपर्यटकाः (पुरुषाः) धर्मं पृष्ट्वा गुलिकाप्रहारैस्सद्य एव घातिताः। प्रायेण नवदम्पती-युगलानि आसन्। वधूनां तदेव सौभाग्यवर्धकं सिन्दूरमपमार्जितमातङ्किभिः। अवर्णनीयैषा मर्मान्तिका दशा।

24.04.2024 दिनाङ्के प्रधानमन्त्री श्री-नरेन्द्र मोदी बिहारप्रान्ते डिण्डिमघोषं कृतवान् 'पहलगाम' घटनाया प्रतीकारार्थम्। प्रत्यर्थयितुं सेना स्वतन्त्रीकृता प्रधानमन्त्रिभिः। 'ऑपरेशन सिन्दूर' नाम्ना मई-मासस्य 6-7 दिनाङ्कीय-मध्यरात्रौ 01.05 वादने जल-थल-वायुसेनाः संघीभूय पाकिस्तान प्रायोजितातङ्किस्थलानि समुन्मूलयितुं सैन्य-कार्यवाहीं समारभन्त। रात्रौ 1.30 वादनात् पूर्वं 25 मिनटात्मकसमय एव दुर्धर्षातङ्किनां नव-संख्याकानि आतङ्किस्थलानि साफल्येन विध्वस्तानि।

पाकिस्तानाधिकृतकश्मीरे (P.O.K.) पञ्च, पाकदेशस्य पंजाबप्रान्ते च चत्वारि आतङ्कवादि-स्थानानि समुन्मूलितानि। 1971 खीष्टाब्दादनन्तरं प्रथमोऽयमवसरो यत् पाक-देशस्य पञ्जाबप्रान्ते भारतीयसीमातः सैन्य-कार्यवाही सञ्जाता। पञ्जाबप्रान्ते बहावलपुरस्थाने मौलाना मसूद अजहर-संचालित 'जैश-ए-मोहम्मद'-संघटनस्य 'मरकज-सुभान-अल्लाह' नाम्नाऽऽतंकिशिविरमासीत्।

पञ्जाबप्रान्त एव शेखपुरा-जनपदे हाफिज सईद-संचालित- 'लश्कर-ए-तैयबा' संघटनस्य 'मुरीद के' स्थाने 'मरकज-तैयबा' नाम्नाऽऽतंकिशिविर-मासीत्। शियालकोट-जनपदे 'हिज्बुल-मुजाहिदीन' प्रमुख-सैयद सलाहुदीन-संचालिते 'महमूना जोया' शिविरम् अथ च 'सरजाल' शिविरम् आस्ताम्। सर्वाण्येतानि आतंकवादिशिविराणि भारतीयसेनाद्वारा ध्वस्तानि।

आतंकवादिसंघटनप्रमुखानामेतेषां मुख्यालया

---

१. सिन्दूरं नागसम्भवम्। नागं-सीसं, सम्भवः-उत्पत्तिस्थानम् अस्येति। फलतः सिन्दूरं रक्तवर्णचूर्णकम्। 'स्वयं सिन्दूरेण द्विपरणमुदा मुदित इवे'ति प्रयोगः।

अपि धूलिसात्कृता:। एतेषां विध्वंसनाय 'स्कैल्प क्रूज मिसाइल' 'हैमर स्मार्ट बम' संज्ञकानाम् उन्नतास्त्राणामुपयोगोऽस्मिन् सैन्याभियाने कृत:। तेन शताधिकातङ्किनो गतप्राणा अभूवन्। भारतीय-सेनाया लक्ष्यं केवलमातङ्किशिविरविध्वंसनमासीत्, न तु पाकसैन्यशिविराणि, न वा जनसामान्यम्। परमपरं द्यु: 8 मई 2025 दिनांके पाकसेनयाऽऽक्रमणस्य प्रत्युत्तरं पाकप्रयुक्तानि 'मिसाइल' 'फाइटर जेट्स' ड्रोन्सप्रभृतीनि निष्प्रभावितानि। एतदर्थं 'एस-400 ट्रायम्फ' तथा 'बराक-8 मिसाइल' अस्त्राणामुपयोगो भारतीयसेनया विहित:।

पाकिस्तानस्य रावलपिण्डी-कराची-लाहौर-प्रभृत्यनेकेषु नगरेषु 'एयर डिफेंस रडार' तथा तत्प्रयोगपद्धति: ध्वस्तीकृता। एतदर्थं 'इजरायल' निर्मित- 'हारोप ड्रोन' इत्यस्योपयोग: कृत:। एवमेव सैन्याभियानसाफल्याय स्वदेशिनो 'ब्रह्मोस मिसाइल' इत्यस्य, अपि च फ्रांसनिर्मितस्य 'राफेल' युद्धकविमानस्योपयोगोऽपि जात:। अत: पाकप्रयुक्तानि चीन-अमेरिका-तुर्की-निर्मितानि सर्वाणि अस्त्राणि विफलीकृतानि। युद्धेऽस्मिन् मौलाना मसूद अजहर-परिवारस्य 10 सदस्या: चत्वारश्चान्ये सम्बन्धिन: आहत्य 14 जना विगतप्राणा अभवन्।

परमाणुसम्पन्न-राष्ट्रद्वयस्य मध्ये प्रथममिदं ड्रोनयुद्धम् यस्मिन् विजयि राष्ट्रं भारतं विश्वस्मिन् जगति प्रोन्नतसैन्यशक्तिसम्पन्नमिति सिद्धम्। पाकिस्तानस्य प्रार्थनया भारतेन 10.05.2025 दिनांके सायं पञ्चवादने युद्धविरामस्तावदेवोद्घुष्टो यावदातङ्किगतिविधि: पाकिस्तानेन न विधीयत इति।

भारतदेशस्य सैन्याभियानं लक्ष्यकेन्द्रितम्, अन्यूनानतिरिक्तम् अनुत्तेजकञ्चासीत्। विदेशसचिव: श्री-विक्रम मिसरी, विंग कमाण्डर व्योमिका सिंह महोदया, कर्नल सोफिया कुरेशी-महोदया च भारत-पाक-संघर्षस्य यथाकालं यथार्थवृत्तं प्रास्तुवन्। सैन्याभियानमिदमत: परम् आतंकवादरोधी सिद्धान्त: सञ्जात:। आतंकवादविरोधेऽनेन कटुसन्देश: प्रेषित:। आतंकवादस्य वस्तुस्थितेरवगतये भारतीयराजनेतृणां समूहसप्तकम् अखिलेऽपि विश्वे देशेषु प्रेषितं वर्तमानसर्वकारेणेति वैशिष्ट्यम्। 'ऑपरेशन सिन्दूर' इति सैन्यप्रतिक्रिया वस्तुतोऽकारणं निर्दोषपर्यटकानां कृते सादरं श्रद्धाञ्जलि:, अपहृतसिन्दूरविधवानां कृते च सान्त्वनासन्देश:, आतङ्किनां कृते च दण्डोपदेश:।

**– सम्पादक:**

जोधपुरस्थ-जयनारायणव्यासविश्वविद्यालये

संस्कृतविभागाध्यक्षचर:,

जयपुरस्थ-जगद्गुरु-रामानन्दाचार्य-

राजस्थान- संस्कृत-विश्वविद्यालये

व्याकरणपीठाध्यक्षचरश्च।

दूरभाषाङ्का: 8386943655

# सिन्दूरमूल्यं कियत्

❑ प्रो.ताराशंकरशर्मा पाण्डेयः

**सिन्दूरपूरोस्ति यः**

किं धर्मः शृणु रेऽस्मदीयनियतः पृष्टस्त्वया भूरिशः
कान्तारव्रजकशोभमानप्रयतः सिन्दूरपूरोस्ति यः।
योद्धा भारतरक्षणैकनिपुणः सीमाप्रतिष्ठापितः
सोयं कालकरालनामप्रथितः श्रीधर्मराजोऽपरः॥१॥

**दुःसाध्यरुक्कर्कटः**

आतंकः कटुकौषधोपशमनो दुःसाध्यरुक्कर्कटो
मूलं यस्य विलोक्यते हि सकलैः पाके दुराचारिणि।
ज्ञात्वा सैष चिकित्सते सकुशलं दौर्बल्यपूरं मनो
वैद्यो भारतसंज्ञितोस्ति प्रथितः पीयूषपाणिः पटुः॥२॥

**शसीकृतः साम्प्रतम्**

ग्रीष्मे पर्यटनाय रुच्यपहल-ग्रामागतौ दम्पती
क्रौञ्चद्वन्द्वविशेषशेपरुदितं श्रुत्वा तथा निर्णयः।
सम्बन्धे प्रतिवेशिनोर्विगलिते जाते द्वयोर्देशयो -
रस्माभिर्जलसिन्धुसन्धिरयशाः शसीकृतः साम्प्रतम्॥३॥

टीका - साम्प्रतम् = उचितमित्यर्थः।

**ब्रह्मोस्त्रनामास्त्रके**

पापात्मा छलयुद्धकर्मकुशलो जानाति तातं न हीं
मोदी ज्ञापयिता स्त्रियाः पतिकृते सिन्दूरमूल्यं कियत्।
अस्माकं प्रतिशोधपावकघने ब्रह्मोस्त्रनामास्त्रके
ना पाकोऽस्ति स पक्वताविरहितस्तस्माद् ध्रुवं पच्यते॥४॥

टीका - ज्ञापयिता = बोधयिता, तृचि लिट्लकारे वा (बता देगा) ब्रह्मोस्त्रम् - बृंहति उस्रान् किरणान् सूर्यं वा इति॥

**मोघं फटाटोपणम्**

आतंकी पवनाशपाक इह ते मोघं फटाटोपणं
तातस्ते गरुडो विहायसि चरः कश्मीरनागान्तकः।
कालाकाशपिनाकशस्त्रपरिभृत् सैन्यः पुरः तिष्ठति
सोसौ पूरुषनाग आत्मधिषणो निष्कासितुं तत्परः॥५॥

टीका - पवनाशपाकः = सर्पशिशुः सर्परूपपाकिस्तानदेशो वा सपोला इत्यर्थः। फटाटोपणम् = फणाप्रसरणम्।
आटोपः= दर्पः। गरुडः = खगेश्वरः एतन्नामकास्त्रञ्च।
कालाकाशपिनाक- शस्त्रपरिभृत् = कालरूपे आकाशपिनाकाख्ये शस्त्रे परिबिभर्तीति।

**बुक्कारशीलः सदा**

व्यात्तास्यः प्रतिवेशिमुख्यवदनो बुक्कारशीलः सदा
पाकश्वा लघुवक्रपुच्छचरितोऽकाण्डे परीवर्तकः।
आतंकी नवरंककंककुटिलो जंघामिषच्छेदकः
सोयं गच्छति मित्रतां किमिव रे! दूरं विधेहि द्रुतम्॥६॥

**क्ष्वेडापरा दृश्यताम्**

मातुर्मृत्तिसुगन्धसत्यशपथो जीवामि रक्षात्मको
मातुः पूरयितुं सदर्णमररे! सन्नद्धचेता अहम्।
मद्रक्तोल्बणता नृसिंहसदृशी क्ष्वेडापरा श्रूयतां
देशो भारतसंज्ञितोऽपि विनतः तस्यात् कथं शत्रुणा॥७॥

**सौभाग्यरक्षाकरः**

आकाशक्षितिजीवनत्रिगतिको नानाकलादीक्षितः
सीमातत्परभारतीयसुभटो दृष्टो हृदुत्साहसी।
राष्ट्रीयालिकराजमानयशसः सौभाग्यरक्षाकर
आदिष्टः पुरुषप्रधाननिचयैः योद्धुं परः सक्षमः॥८॥

टीका- सौभाग्यम् = सिन्दूरम्। सुभगायै हितम्।

**रिङ्गन्ति ते दंशकाः**

धर्मातंककराश्च ये बिलशया रिङ्गन्ति ते दंशकाः
तादृक्षं विचरन्ति दिक्षु कुटिला धर्मोपचारक्रमे।
दिष्टः कर्मणि शिक्षिताश्च कुशलाः कृष्णोपचारक्रमे
तत्कुर्मो विषदन्तमूलनशनं विष्ट्वा गृहे सत्वरम्॥९॥

टीका - उपचारः = व्यवहारः क्रिया वा। रोगप्रतिकारः।
विषदन्तः = सर्पः।

**स्वर्गं प्रयातीप्सव:**

आद्य: सोऽजहरो मसूददुरितो दीनो दुरिछद्युति:
किंमित्राणि सहैव बन्धव इत: स्वर्गं प्रयातीप्सव:।
पश्यारे! पितृकाननं हि पुरत: सज्जं मसूदाक्षिणो:
सन्नद्धा युधि भारतीयपुरुषा: सिन्दूरलक्ष्यान्विता:।।१०।।

टीका – दुरिछद्युति: = निन्दितच्छवि:। पितृकाननम् = श्मशानम्। अरे मसूद! = आतंकवादप्रधान! इति सम्बोधने।

**शीघ्रं न स्यां शिक्षिता**

यो यो युद्धसहायतां चरितवान् सोयञ्च वैरी मम
तत्कर्मायतिदर्शकश्च शनकै: शीघ्रं न स्यां शिक्षिता।
व्यापारेऽस्तमितं करोमि तमरे सम्बन्धविच्छेदको
द्रक्ष्ये भारतकूटनीतिचरण: पार्श्वस्थशत्रुं द्रुतम्।।११।।

टीका – द्रुतम् = शीघ्रं पलायितं वा। द्रवति स्मेति। द्रु + गत्यर्थेति कर्त्तरि क्त:।

**सिन्दूरमूल्यं कियत्**

'न्यायोभूज्जयहिन्द'! मूर्द्धधरणी–सिन्दूरपूरोभवत्
प्राप्तं भारतसैन्यवीरप्रथमैर्लक्ष्यं च निर्धारितम्।
पाकिस्तानरसासुराग्रगणिताऽऽतंकिप्रणाशोभवद्
हा चीत्कारपरोस्ति रोदनपर: पाक: परातंकित:।।१२।।

**काश्मीरराज्यञ्च मे**

रे रे पाक विमुञ्च नाकभुवनं कश्मीरराज्यञ्च मे
किं किं नोधिकृतं त्वया बहुतिथ: कालश्च संयापित:।
नो चेद् वीक्षितमेव कोपचरितं सिन्दूरलक्ष्यत्वरं
शक्तोहं पुनरात्मयोगसहसोपायं विधातुं चितम्।।१३।।

**सज्जैर्बलूचै: कलौ**

जन्यं भारतपाकयो: प्रसरितं त्रस्तं त्र पाकं पुन:
दृष्ट्वा विग्रहबद्धबुद्धिहृदयै: सज्जैर्बलूचै: कलौ।
पश्चादर्धपदं बलादवसरे स्वीकृत्य पाकात् पृथक्
पाकश्वासनिरोधबोधनिपुणैर्देश: स्वतन्त्र: कृत:।।१४।।

टीका – कलौ = कलहे। पश्चादर्धपदम् = अपरार्द्धम्। पाकश्वासनिरोधबोधनिपुणै: = पाकस्य श्वास: प्राणो वा तस्य निरोध:।

**सिद्धं नवं भारतम्**

आतंकासुरपीडितं प्रतिदिनं जातं समस्तं जगत्
सन्त्रस्त: सुजन: पलायनपरो मुक्त्वा शिशुं मातरम्।
भार्या भर्तृतनुञ्च वीक्ष्य विकला प्राणैर्विहीनं पुर:
तद्दृष्ट्वा सुरबुद्धयुद्धमतिकं सिद्धं नवं भारतम्।।१५।।

**चक्रोत्तमाङ्गञ्च भो:**

तेजोरुद्रपिनाकवद्धि बलवत् पाकोपदेशाग्रियं
शौर्यादर्शसुदर्शनं गुरुतमं वक्षोविदाराकरम्।
अस्माकं त्रिबलं जलस्थलनभो–रूपं रिपूणां वरं
विश्वामित्रसमं रणे विजयते चक्रोत्तमाङ्गञ्च भो:।।१६।।

टीका – तेजोरुद्रपिनाकवद् = तेजोरुद्र–पिनाकनामकास्त्रयुक्तम् अग्रियम् = प्रधानम्। अग्रे भवम् अग्र + घ। प्रधानम्। आकर: = श्रेष्ठ: इति मेदिनी। दरम् = भयम्। चक्रम् = राष्ट्रं तस्य उत्तमांगम् = मस्तकम्।

इति जयपुरवास्तव्येन राष्ट्रपतिसम्मानित–प्रतिनवबाणभट्ट–पण्डितश्रीमोहनलालशर्मपाण्डेयात्मजेन श्रीकल्लाजीवैदिक–विश्वविद्यालय– कुलपतिना प्रोफेसर(डॉ.) ताराशंकरशर्मपाण्डेयेन प्रणीतं '**सिन्दूरमूल्यं कियत्**' नाम सिन्दूरषोडशीकाव्यं सम्पूर्णम्।

– 2381, पाण्डेय भवन, खजाने वालों का रास्ता,
जयपुर (राज.) 302001

# पहलग्रामातंकः

❑ डॉ. रामनारायणझाः

१

आतंकः किल चेतसां प्रतिपलं चान्दोलयत्रैकशः
सूत्राणि प्रथितः पुनः पुनरहो झंकारयन् नित्यशः।
सर्वेषामनुनाशनो मनुभुवां विश्वस्तरीयो महान्
गर्ह्यो गर्ह्यतमो ह्रासी सुकृतिभिः सर्वस्वसंहारणः।।

२

पाकिस्तानधरास्य पोषणकरी जानाति विश्वस्थली
दण्डैस्तं नहि नाशयेत्कथमहो दुःखन्नवै भावयेत्।
अन्येषां विततं विलासहतकं कृच्छ्रं महाजालिका
विस्फोटैः खलु तां क्षिपेद्धि क्षटिति प्रोत्कृत्य धीरो ध्रुवम्।।

३

घाट्यां चद्विहितं कुकृत्यचरितं पृष्ट्वा च धर्मं ततः
ज्ञात्वा हिन्दुरयं जघान किल तान् चातंकदावानलः।
धर्मोऽनेन च शक्यते प्रतिपदं ज्ञातुं हि चातंकिना-
मिस्लामो नितरां नरानुहननस्तन्नाशयेत्सर्वशः।।

४

वैधव्यं वहतीति काऽपि मनुजा! छाया पितुः कस्यचित्
भ्रातुश्चापि ननाश तोकशतकस्योतेति कण्ठोऽस्फुटः।
वाच्या नैव दशा च तुन्नमनसां दृश्या कथं सम्भवेत्
दुःखाब्धावनुमज्जितोऽखिलनरो देशस्य संतापितः।।

५

दण्डः प्रोच्चतमो भवेदिति दृशा देशो ददर्शाशु वा
नेतारं किल मोदिनं स्ववचनैर्बद्धं महापौरुषम्।
सोऽप्याहाशु विनाशयेयमधुना चैनं हि तत्पोषकं
चक्रे वोत तथैव दण्डदयितो मोदी महानायकः।।

६

आतंकस्य गृहाणि नूनमनिशं स्थानानि सर्वाणि च
चातंकान् तत्पालकान्नु सुतरामुन्मूलयन्सर्वशः।
हाहाकारवचस्करान् प्रतिपदं संघातयन् सर्वतः
सूर्यश्चैव चकास्ति भो! हि गगने मोदी महानायकः।।

७

नेदिष्ठे प्रतिवासिनं जनहनं वै पाकदेशं प्रधा-
नामात्यः मम देशरक्षणकरो मोदी महावल्लभः।
विध्वंसीकृतवान् विरोधिविपिनं विस्फोटनैः सर्वशः
स यो वा जयते जनेषु मतिमान् दण्डी महाधैर्यकः।।

८

आतंकी किल देश एष निखिलैः गद्यो गिरा सर्वतः
देशैः सर्वहितैषणैर्नु मयका नित्यं त्वया चापि वै।
आतंकः खलु तत्करस्त्वरितकं सम्मर्दनीयोऽधुना
मोदी तत्कुरुते शुभैषिवचनः प्रक्षेपणैः शूरकः।।

९

उत्कुर्व्यात् परिपन्थिनं प्रतिपथं विध्वंसनास्त्रैस्सदा
बीजं चापि विनाशयेद्धि सुतरां कालोऽनुकूलोऽधुना।
मूलं तस्य विलोपयेच्च रभसा चोत्पाटयेद्धैर्यकः
योधो वीरभुवां स्वदेशतनयो मोदी ससेनो मुदा।।

१०

त्राहि त्राहि वचोभिरेव कुरुते हाहाकृतं सर्वतो-
नातंकः परिमर्दितः प्रतिगतं कक्षानुसंत्रायते।
भीरुः लोकहितानुहा बहुरुतं नित्यं करोतीति हा
नाहं वा च करोमि हेति वचनं वक्तीति मिथ्या सदा।।

११

दुष्टः क्लिष्टतमः शठोऽशुभमनाः वा लम्पटो लोलुपः
धूर्तो दण्डयमश्च दुष्कृतितमो मायाचरो वासुरः।
तं सद्यो नरमेधिनं विकृतिगं नूनं समुत्पाटये-
दातंकं प्रतिदानवं च रभसा कांक्षन्नु देशोऽधुना।।

१२

सार्धं चास्ति विपक्षिणान्नु निवहो देशस्समस्तोऽधुना
सेनाभिः खलु मोदिना च मनसा शूरेण संहारिणा।
शत्रूणां प्रतिवेशिनां हतिमतां चातोऽनुवच्मीति भो!
नूनं नाशय छिन्धि भिन्धि निखिलं चातंकसंवादिनम्।।

१३

विश्वासो हि कदापि नैव कुशलैः कर्त्तव्य एवोचितं
घातो वै कतिशः कृतोऽतिनरकैश्चातंकिभिर्भूरिशः।
मूलं नाशयिताद्य चेन्मम मुदा सेना च शूरोऽखिलः
मन्येऽहं च सुरक्षितः किल महान्देशो हि नः भारतः।।

१४

सिन्दूराख्यदृशा च शल्यमकरोत्सेना ममेष्टं तुदा
देशो मे भविता जयी पुनरहो सम्मर्द्य शत्रूनहो।
सम्यक् कर्तय तान् पुनः पुनरहो भूम्यां नु सम्मेलय
हन्मे भो! भविता प्रसन्नमतिशः देशस्य नूनं नृणाम्।।

१५

मथ्नीहीति वचांसि देशजनतानां वै सदाऽऽर्तकिनः,
पाकिस्तानमपीति गायतितमां देशस्समस्तोऽधुना।
सद्यः नाशय धैर्यतो विकृतिनो दुष्टान् खलान् सर्वतः
प्रोच्चं त्वं मतिमान्नु दुष्टदलनः शूरो महान्नायकः।।

१६

युद्धं वै खलु वर्धते च शनकैः सद्यः समावर्तय,
राणेवाशु विमर्दयस्व सकलान् म्लेच्छानहो सर्वथा।
सिंहश्चेव गजान्नु दुष्टदलनस्त्वं वै सुतो भारतः
सिन्दूराणि च मातुरद्य रभसा रक्षाय शूरो महान्।।

१७

शस्त्रास्त्रैस्सकलं विमर्दय किल प्रत्यग्रतस्सैनिकान्
शत्रूणां परितापयस्व परितश्चोत्खातयस्वाधुना।
पाकं दुष्टदलान्वितं जनहनं निर्दुष्टमेनं मम
हत्वा मानुषमद्य दोषिनमथ चोत्पातयस्वाखिलम्।।

१८

तत्रत्यं सकलं सुरक्षिततमं गुप्तं च शस्त्रं पुरा
चास्त्रं चापि बलान्नु गूढमनिशं विध्वंसयस्वाधुना।
तूर्णं तत् कुरुताद्धि येन पुरतो नश्येदहो शत्रुकः
विस्फोटैरमुकं परं निरयकं चोत्पातयस्वासुरम्।।

१९

सिन्दूरं खलु नामतोऽतिनिपुणं युद्धं समायोजितं
द्वित्राणीति दिनानि यावदिदकं तस्माच्च सन्धिं प्रति।
उक्त्वा रक्षितवान्नु पाकमधमो टृंपः सशक्तोऽधुना
सन्धिं भो! मनुते च नैव बलवान् संरोदयस्वासुरम्।।

२०

सन्धिं त्रोटितवान् पुनः पुनरघः पापी खलो लम्पटः
सद्यस्तं परिसादयस्व निखिलं विक्षेपणैर्ध्वंसिभिः।
सस्फोटं किल धूलिसाद्धि कुरुताद्ध्यो न गर्जं भवेत्
मूर्धानं परिकांक्षतोऽथ सकलो देशो ममायं मही।।

२१

देशेऽस्मिन् बहुराक्षसा नवनवा नित्यं विशन्तस्तथा
चात्रागत्य वसन्ति हन्ति जनतां राष्ट्रस्य संहारकाः।
म्लेच्छाश्चाघतमा नु शोणितपिबाः संस्कारहीना नराः
पापीया ननु वंगदेशनिवसा राष्ट्रस्य नो नाशकाः।।

२२

शाला धर्ममयी किमस्ति? मम भो राष्ट्रं भणेयुः समे
कृत्वा हानिमघाः सदा विविधिकां चेतस्ततो यान्ति वा।
धर्मं ते परिवर्तयन्ति परितः चेस्लामयन्तेतराम्
जैहादं परिशिक्षयन्ति नितरां नो हा जनान् सर्वशः।।

२३

लज्जां ते परिभंगयन्ति सुतरां स्त्रीणां ततोऽनर्गलं
वल्गन्तीति दृशा श्रुतेन परितः पश्यामि भूयस्तु हा।
आकर्ण्यापि न वै वदामि किमपीहेतीति जिह्नेम्यहं
उत्तिष्ठाथ नु हिन्दवः किल सखायो नः समुद्घोषणा।।

२४

देशेऽस्मिन्परिपन्थिनो बहुतमाः राष्ट्रस्य नाशाय ते
हान्यै चाद्य समन्ततः प्रतिपदं मातुर्यतन्ते सदा।
सर्वान् तान् परितापयस्व रभसा हिन्दो! महान्त्वं बुधः
मेधाभिः किल माययापि सुतरां वीर्य्येण शौर्येण वा।।

२५

अत्रत्यान् प्रथमं विनाशय ततः देशान्तरस्थान् द्विषः
काश्मीरे निखिलैः च दुर्गभरनिशं बंगे च दृष्टं जनैः।
दुष्कृत्यं ननु किन्न जातमहह ध्माताश्च वै हिन्दवः
गेहानि प्रविहाय देशजनता जग्मुः कुतो नैव वा।।

२६

राष्ट्रं पृच्छति यद् जितं महदिदं युद्धं नु वा मोदिनं
तस्माद्धा विरराम किन्नु फलितं लब्धं मृतानामथ।
देशं चाद्य हताशितः पुनरहो मोदाय नो जायते
नैवेहाथ पराजितोऽपि सुतरां पाकी जिगायाद्य भो!।।

२७

भो! शत्रून् परिजित्य चापि नहि नो लाभी न देशोऽधुना-
ऽविश्वस्ते कुरुषे कथं कथमहो विश्वासमेवं फलम्।
न स्यात् सुष्ठुतरं गभीरवचसा वच्मीति भोः श्रूयता-
मग्रे छद्मितमः पुनः पुनरहो प्रोत्साहयेच्छद्मिनः।।

२८

पापा ये किल सन्ति वाथ छलिनश्छद्मानुचारे रताः
पूर्वस्मात् परिलोकयन्ति जनता भो! भारतीयाः खिदा
वामा वा विपरीतमेव दनुजा नित्यं चरन्तीति हा
धिङ् नः नष्ट नु पौरुषं हि बहुशस्तत्याज शत्रूनुता।।

२९

भो! चोज्झेत्रहि चामयं परमहो नो चेद्द्वयं नित्यशः
एधेताशु पुनः पुनः किल लघीयो वापि जानेऽप्यहम्।
शास्त्राणि प्रवदन्ति यद्धि वचसा चोवाच भो! पण्डितः
चातस्तद् ह्यनुपालयेन्नु मनसा हेतुं विना सर्वशः।।

३०

राष्ट्रं मे प्रथमं ततोऽहमनिशं राष्ट्राय सर्वे नराः
जीवन्तः निजजीवनं किल सदा योधाः मुदा सर्वतः।
दुःखेनाशु सुखेन वा भरतजाः शान्त्या च धृत्याधिका
दुःखातंकविवादिनोऽनुमदिनो जह्यात्नु नः कांक्षितम्।।

*With best compliments from :*

Regd. Office & Works : HAMIRGARH
Distt. BHILWARA-311025 (Raj.)
Tel. : 01482-286102, 03, 05 & 06
E-mail : bhilwara@kanoria.org
Website : www.ainfrastructure.com
CIN : L25191RJ1980PLC002077
GST No.: 08AABCA7493D1ZO

# Kanoria Energy
## & Infrastructure Limited

(Formerly Known as A Infrastructure Limited)

MANUFACTURER OF MAZZA AC PIPES KIRTI BRAND

411, IIIrd Floor, Shalimar Complex, Church Road, JAIPUR-302001 (Raj.)
Ph. : 0141-4019691, 2370566 • E-mail : jaipur@kanoria.org

क्रमशः

# पृथुवंशम्

(सप्तमः सर्गः)

❑ कविसार्वभौम अभिराजराजेन्द्रमिश्रः
पद्मश्रीः

सम्प्राप्य देशिकवरस्य निदेशमन्त्रं, राजा मनोऽवनिनवीकरणे युयोज।
को नाम वत्सलपिता तनयां सुवर्णा, निर्भूषणां क्षणमपीक्षितुमुत्सहेत? ।।१ ।।

अन्येद्युरेव चरवक्त्रततैर्निदेशैः, ख्यातानसौ कुशलशिल्पिन आजुहाव।
ते चापि वातरयधूतपयोदकल्पा, आसेदुरुत्सुकतया नृपतेस्समक्षम् ।।२ ।।

तानाह वैन्य ऋतपः शृणु भद्र! सोऽहं, मन्ये जगत्कृतममुं स्थपतिं स्वमाद्यम्।
व्याप्नोति विश्वमखिलं ननु वास्तु ब्रह्मीभूयैव यो गिरिनदीवनिकादिकर्ता ।।३ ।।

यो विश्वकर्मपदवीं ननु सा बिभर्ति, देवेषु दैत्यनिवहेषु मयोऽथ विज्ञः।
मर्त्येषु वा स्थपतयश्श्रुतिगोचरा मे, तस्यैव ते भगवतो विनताऽधमर्णाः ।।४ ।।

नाऽहं प्रभुर्न च सिसृक्षुरिदं नु विश्वं, वृन्दारकोऽपि न च वञ्चितकालमृत्युः।
मर्त्योऽस्मि राजपदवीमुपरूढकीर्तिः, इच्छास्ततो नु सकला मनुजानुकूलाः ।।५ ।।

दुग्धा मया वसुमती प्रजया समं भो, प्राप्तं समीहितमपि प्रचुरं हि सर्वैः।
तस्माद्बुभूषुरहमस्मि कृतज्ञभावैर्जातामिमां मम सुशासनरङ्गभूमिम् ।।६ ।।

नाऽलङ्कृता नृपतिना न च संस्कृतेयं, केनापि पूर्वमत एव बभौ विरूपा।
नम्रां ततोऽहमिमकां सुदृढं चिकीर्षुः, विच्छित्तिविभ्रमसहस्रककोटिकम्राम् ।।७ ।।

कुर्वन्तु मे स्थपतयोऽद्भुतराजधानीमादौ, सुमङ्गलमयीमलकोपमानाम्।
नद्यास्तटे क्वचिदनोकहवारिशस्यकान्तारनिर्झरमहीधरमञ्जुभोगाम् ।।८ ।।

श्रुत्वा वचो नृपपृथोर्निजगाद शिल्पी, शिल्प्यग्रगण्य उदितेन्दुमुखं नृपालम्।
स्वामिन्! चिराय मम चित्तहसस्पदं तत्, देदीप्यते शुचिसरस्वतिका तटान्ते ।।९ ।।

नाम्ना पृथूदकपुरी मयका विधेया, तत्रैव मां क्षितिशचीपतयो दिशन्तु।
आश्रित्य शास्त्रनियमान् प्रभवत्पुराणान्, यद्दर्शनेन भवतां भविताऽनुतोषः ।।१० ।।

प्राकारभित्तिपरिखापरिरक्षितेऽस्मिन्, विस्तीर्णमञ्जुलपुरेऽस्त्यमरावतीके।
व्यायामनृत्यमधुवेश्मविटङ्कदोलाशुद्धान्तकोविदसभादि यथोचितं स्यात् ।।११ ।।

नाऽहं मयो दनुसुतो न च विश्वकर्मा, मर्त्योऽस्मि शिल्पहृदयो मनुवंशकेतो!
श्रद्धैव मे पुरमिदं भुवि निर्मिमीते, सामर्थ्यमेव कियदस्ति मम द्विदोष्णोः ।।१२ ।।

श्रुत्वा विनीतवचनं स्थपतेर्मनस्वी, राजाऽनुभूय तदुदारबृहन्निसर्गम्।
ओमित्युवाच सनिदेशममात्यवर्गं, कर्तुं यथोचितमुपायभरं दिदेश॥१३॥

राजाज्ञयैव तरसा समुदीर्णकल्पः, शिल्पी समं परिजनैस्त्वरितं प्रतस्थे।
भूमीपरीक्षणकृते समभीष्टक्षेत्रे, दैवज्ञवंशगुरुसैन्यचरैश्च सार्धम्॥१४॥

प्राच्यामवैक्षत स यत्र जलप्रवाहं, खाताधिकामपि मृदां ननु पूर्यमाणाम्।
खातस्थिरं जलमनाहतपुष्पदीपं, शिल्पी चिकाय पुनर्निर्मितये धरां ताम्॥१५॥

स्मृत्वैव शास्त्रवचनं भवनप्रमाणं, जाता तदाननविभा हिमहारशुभ्रा।
हर्षं निजं स्मितभरैश्च कटाक्षपातैर्मध्येजनं प्रकटयन् स यमीव तस्थौ॥१६॥

भूः स्वामिनी पुनरियं जडबालिशानां, गोचारिणी खनिमती कृषिकर्मयोग्या।
कान्ताऽप्यपाश्रयवती सुभगा च भोक्तुं, जीवन्धरा विबुधमातृकलक्षणाऽपि॥१७॥

श्वभ्रं जलेन परिपूर्य कृता परीक्षा, नाल्पं बभूव सलिलं न च रन्ध्रलीनम्।
तेनैव तत्र विलसेन्नृप राजधानीत्येतद्धि शिल्पियतनं विशदीबभूव॥१८॥

मासैस्ततः कतिपयैः पुलिनेऽपगाया, पल्ल्यग्रहारपुटभेदनकर्वटाद्यैः।
संरक्षिता विविधसौधचयैः प्रपन्ना, राज्ञः पृथूदकपुरी विललास रम्या॥१९॥

वैराजमाणिकत्रिविष्टपपुष्पकाख्याकैलासनाम यदभूद् द्युसदां विमानम्।
तद्वद्विमाननिकुरम्बमितोऽपि शिल्पी, वास्तुप्रसारकुशलो विदधे विधिज्ञः॥२०॥

उष्णीशभद्ररुचकक्षितिभूषणाद्याः, श्रीकूट–भूजय–कुबेर–धराधराख्याः।
शालाक्षनन्दिगजयूथपचित्रकूटाः, व्यामिश्रस्वस्तिकपदा प्रमदाप्रियाश्च॥२१॥

ख्याताश्च ये विशदवास्तुविमानभेदा, एकद्विमेखलयुता बहुमेखला वा।
मेरुश्च यो द्विदशभूमिक एव सोऽपि, सन्निर्मितस्स्थपतिनोत्तमराजधान्याम्॥२२॥ (युग्मकम्)

ये शुक्तिकाऽलकविमानकनन्दनाख्या, ये चापि मन्दरचतुष्ककपारियात्राः।
ते पञ्चपौर्वसहिता नृपतेर्नगर्यां, प्रोत्थापिता गगनचुम्बिन ऊर्ध्वसौधाः॥२३॥

सौरो रथो नभसि हन्त विमानशृङ्गलग्नो भवेन्न पथि संस्थगितः क्वचिद्वा।
सम्भाव्य तत्स्थपतिना न च मेरुसीमा, प्रोल्लङ्घिता यदवनीजनसम्मुदेऽभूत्॥२४॥

कादम्बभृङ्गशुक काककपोतवर्णा, ये वा दृषत्समुदया गणिताः प्रशस्ताः।
सौधाः समेऽपि नृपतेर्विहिता मघोनश्चापच्छवीः सुषमयाऽतिदृढं शयानाः[१]॥२५॥

१. चापच्छवीः सुषमया दृढम् अतिशयाना इति ग्राह्यम्।

सौधानवेक्ष्य पृथुभूपतिसौख्यकन्दान्, रम्भोर्वशीप्रभृतयोऽपि सुराङ्गना यत्।
विस्मृत्य मोहवशगाः किल वैजयन्तं, जात्वागता नृपमपत्रपयैव विद्धाः।।२६।।

अभ्यस्त एव मलयाचलकन्दराणां, कावेरिकापुलिनसञ्चरणोत्सवानाम्।
भौमस्समीरण उदारतयैव राज्ञो, मेरूच्चभूमिमुपगन्तुमहो शशाक।।२७।।

अभ्रंलिहेषु पृथुराजमहालयेषु, रात्रौ बहिर्ज्वलितवर्तिसहस्रदीपाः।
नक्षत्रलोकमवतार्य धरित्रिकाङ्के, केषां न वा परमविस्मयमाशु तेनुः।।२८।।

तद्भूपसौधकुकुवाकुरुतिं निशम्य, देवाङ्गनाः सुरतखेदगृहीतनिद्राः।
प्राभातिकीं बत विहाय चितिप्रसुप्तिं, प्रोन्निद्रिता यदभवन् दयितप्रियं तत्।।२९।।

तौर्यत्रिकोत्थविविधध्वनिसम्प्रसारैर्वैमानिकैर्यदभवन् विबुधा अशान्ताः।
कर्णेजपास्तदपि केचन वृत्रहन्त्रे, निन्दामुखेन विनिवेदितवन्त आर्ताः।।३०।।

मर्त्याः मरुत्सख! भवन्त्यमृतान्धसां तत्, मृत्योरनन्तरमहो, विदितं सखायः।
केयं पृथूदकपुरी न्वमरावतीं ते, भौम्यापि गाढमुपगूहति तत्सखीव??३१।।

इत्येवमेव कथनेन भृशं तुदन्तो, देवं शतक्रतुमुपायसमाश्रयेद्धाः।
गन्धर्वकिन्नरसमेधितदुर्विवक्षा, साक्षात्सुराः प्रचकटुर्ननु नर्मवार्ताः।।३२।।

तस्यां समृद्धपृथुभूपतिराजधान्यां, किं किं न हन्त विदधे स्थपतिर्विदग्धः?
त्वष्टा स्वयं स च मयोऽप्यपराजितो वा, नैयून्यमुद्घटयितुं तनुकं न शक्तः।।३३।।

धारागृहञ्च वनिताश्रयणं विचित्रं, व्यायामकौतुकगृहं गिरिचित्रवीथी।
कोष्ठालयाऽऽयुधगृहाणि च नृत्यशाला, निर्यूहकक्षमकरन्दवनी तडागाः।।३४।।

देवालयाश्च महिषासुरमर्दिकायाः, शम्भोः पृथग्गणपतेरथ षण्मुखस्य।
मध्ये महामहिमविश्वविभोश्च विष्णोः, निर्मापिताः शिखरचुम्बितसूर्यचन्द्राः।।३५।। (युग्मकम्)

घण्टापथा उभयपार्श्वघनद्रुमौघाः, जम्बूरसालबदरीवरतिन्तिडीकाः।
शाखामृगप्लुतिसमुच्छलनप्रहारभ्रश्यत्प्रसूनफलपर्णभराः विरेजुः।।३६

सर्वत्र सन्ददृशिरे द्विजकाग्रहारा, शाखास्पदप्रवरगोत्रविशेषनद्धाः।
ये पङ्क्तिपावनपदाः मखयाजिनो वा, उद्गातृहोतृकुलजा यदि ऋत्विजो वा।।३७।।

मालाशिखाघनजटाक्रमपाठिनस्ते, कुन्तापमन्त्रनिपुणा श्रितबालखिल्या।
मन्त्रैश्चतुष्पदमतैर्द्विपदैश्च यागे, स्वीयामथोऽवगमयन्त ऋगुत्तमत्वम्।।३८।।

क्रमशः

# स्वतन्त्रतायास्तात्पर्यम्

❑ डॉ. महेशचन्द्रशर्मा गौतमः
(साहित्याकादेम्या पुरस्कृतः)

सम्प्रति कथं भवेदन्तरिमसर्वकारस्य सङ्घटनात्रविषये जिन्नः सर्वाण्येव नियमवाक्यानि हास्यास्पदान्यवर्तिषत। सर्वां प्रक्रियामल्पार्थां विधाय जिन्नो नेतृत्वे मुस्लिमलीगस्य कार्यसमितिः सुव्यक्तं सङ्ग्रामायागस्तमासस्य षोडशीं तिथिं व्यवातिष्ठिपत्। जिन्ना अजूघुषद् यत् सम्प्रति पाकिस्तानस्य निर्माणन्तु भविष्यत्येव। एतदर्थं तस्य दलमुचितमनुचितं सर्वं करिष्यति। सोऽन्तरिमसर्वकारे भागग्रहणं निरास्थत्। राजप्रतिनिधिवेवेलोऽगस्तमासस्य षष्ठ्यां तिथौ पण्डितजवाहरलालनेहरूमहाभागमन्तरिमसर्वकारस्य निर्माणाय न्यममन्त्रत। नेहरूमहाभागोऽन्तरिमसर्वकारे समासञ्जनार्थं जिन्नां पुनरेकवारं न्यममन्त्रत परं विषमाण्यवर्तिषत तस्य नियमवाक्यानि।

टिप्पणी : नियमवाक्यानि – शर्तें, समासञ्जनार्थम् – शामिल होने के लिए।

अगस्तमासस्य षोडश्यां तिथौ मुस्लिमानां याथार्थ्यं सुव्यक्तमजनि। तस्मिन् दिने मानवतावर्तिष्ट लज्जानम्रमुखी निरतिशयं कुरूपश्च समाजः। बङ्गालराज्यस्य नैकेषु भागेषु व्यवस्थितरूपेण मुस्लिमा हिन्दूनाक्रमिषुः। यत्रापि तैर्हिन्दूसम्प्रदायस्य कोऽपि जनोऽदर्शि मुस्लिमास्तस्य धनद्रव्यादिकं सर्वमपहृत्य तं त्यक्तजीवितं व्यधुः। हिन्दूनां गृहान् व्यापारिककेन्द्राणि विक्रयगृहान् सर्वाण्येव ते प्रथममलुण्ठिषुस्ततश्चाग्निसात् कृत्वा व्यनीनशन्। मुस्लिमानां नियन्त्रणेऽवर्तिष्ट बङ्गराज्यस्य शासनम्। हिन्दूनां लुण्ठनं जनसंहारश्च सर्वं तेषामेव मार्गदर्शनेऽभूत्। आङ्ग्लशासका मूकदर्शका भूत्वैतत् सर्वं निरैक्षिषत। सावर्तिष्ट स्थितिर्यदा देशस्य हिन्दूः शङ्खनादं कृत्वा स्वयमुदस्थात्। विनाशेन हताशो हिन्दूर्यदोदस्थात्तदा भूयोऽपि निष्करुणमभूत् मुस्लिमजनानां संहारः। उभयोः सम्प्रदाययोर्मध्ये तदवर्तिष्ट भयङ्करं गृहयुद्धम्। सप्ताहपर्यन्तं प्रावर्तिष्टैतद् गृहयुद्धं यस्मिन् पञ्चसहस्रादधिका जनास्त्यक्तजीविता अभूवन् पञ्चदश सहस्रञ्च जनानां परिक्षतमभूत्। लक्षाधिकान् जनान् गृहविहीनानकिञ्चनांश्च व्यधात्तद् गृहयुद्धम्। स्थितीनां श्लक्ष्णतां वीक्ष्य विभ्रान्तमाङ्ग्लशासनं राजपत्रेण पण्डितजवाहरलालनेहरू-महाभागं चतुर्दश मन्त्रिभिः सहान्तरिमसर्वकारस्य सङ्घटनाय प्रार्तथत। १९४६तमे संवत्सरे सितम्बरमासस्य द्वितीयायां तिथौ मन्त्रिमण्डलेन सह नेहरूमहाभागः शपथमग्रहीष्ट। शताब्दीनां पारतन्त्र्यानन्तरं भारतीयानामात्मनः सर्वकारं हिंसाया भयावहस्ताण्डवोऽभ्यनन्दीत्। तदनन्तरं वेवेलेन प्रवर्तितो जिन्ना अपि सर्वकारे

समासङ्गनार्थं सज्जोऽभूत्।

मुस्लिमलीगस्य नेतॄणां चिन्तनं सदैव कपटप्रबन्धप्रवर्तितमस्थात्। तेषां मन्त्रिमण्डले समासङ्गनमपि भारतं विभाज्य पाकिस्तान-निर्माणरूपं लक्ष्यं साधयितुमेवावित्त। भारतस्य नोआखलीप्रभृतिषु नैकेषु भागेषु मुस्लिमैः प्रवर्तिता विध्वंसलीलोपाक्रंस्त। लुण्ठनानि, हत्या, बलात्कारा, बलाद् हिन्दूनां धर्मपरिवर्तन-मित्यादयः समुत्पत्तयो मुस्लिमबहुलक्षत्रेषु सर्वत्राश्रावि। एतासां समुत्पत्तीनां वृत्तानि यदा देशस्यान्येषु भागेषु प्रासार्षुस्तदात्यन्तमुग्राभूत् प्रतिक्रिया। मुस्लिमानामेतदाचरणं हिन्दूनां क्रोधज्वालामुददीदिपत्। तदनन्तरन्तूपद्रवा एव सर्वत्रादर्शिषत। मुस्लिमलीगस्य मन्त्रिणः शासनस्य प्रत्येकं कार्ये व्याघातानुपातिष्ठिपन्।

संविधानसभायाः सदस्यानां निर्वाच-नान्यभूवन्। १९४६तमे संवत्सरे दिसम्बरमासस्य नवम्यां तिथौ संविधानसभाया उपवेशनं प्रारब्ध। राजेन्द्रप्रसादमहाभागोऽवर्तिष्टास्याध्यक्षः। नैकैर्वैषम्यैः सङ्कुलावर्तिष्ट संविधानस्य रचनाप्रक्रिया। अथापि सम्पूर्णविश्वे सर्वोत्तमं वर्तते भारतस्य संविधानम्।

१९४७तमे संवत्सरे मार्चमासस्य चतुर्विंश्यां तिथौ माउण्टबैटनो वायसरायरूपेण पदभारमग्रहीष्ट। देशस्य स्थितिं समीक्षमाणो माउण्टबैटनो देशस्य विभाजनं पाकिस्तानस्य च निर्माणमेव भद्रतरममंस्त। विभाजनानन्तरं भारतस्य स्वतन्त्रतायै सोऽगस्तमासस्य पञ्चदशीं तिथिं निरचैषीत्।

भारतपाकिस्तानयोर्मध्ये क्षेत्रस्य विभाजनमवर्तिष्टिकं वैषम्यपूर्णं कार्यम्। मुस्लिम-लीगस्य हिंसापूर्णमाचरणं परिस्थितीर्भूयोऽपि सान्निपातिकीर्व्यधात्। पञ्जाबराज्यस्य बङ्गालराज्यस्य च हिन्दूबहुलक्षेत्राणां विभाजनं कथं क्रियेतेत्यस्या ग्रन्थिलायाः स्थितेः प्रतिविधिरवित्त निरतिशयं दुष्करः। जिन्नाः सम्पूर्णस्यैव क्षेत्रस्य पाकिस्ताने समावेशाय कपटप्रबन्धे व्यासक्तोऽवर्तिष्ट। अत्रान्तरे हिंसाया भयावहस्ताण्डवः समारब्धः। अमृतसरलाहौर-मुल्तानरावलपिण्डीप्रभृतिषु क्षेत्रेषु जघन्यवृत्तयो मुस्लिमलीगस्य जना हिन्दून् सिखांश्चाना-लोचितमवधिषुः। हिंसाया एष ताण्डवः कियान् बीभत्सो हृदयविदारकश्चावर्तिष्टेति नात्र वर्णयितुं शक्यते। हिन्दवो मुस्लिमान् मुस्लिमाश्च हिन्दून् यत्र येन योऽपि हन्तुमशाकि न सोऽवसरं व्यस्राक्षीत्। कांग्रेसाध्यक्षः कृपलानीर्हिंसाया दृश्यं वर्णयन्नभाषिष्ट यद् हिंसाया उच्छृङ्खलं घृणितञ्च रूपं यस्मिन् हिन्दवो मुस्लिमाश्चा-हम्पूर्विकया भागमग्रहीषुर्नातः पूर्वं केनापि दृष्टं भवेत्। सप्तोत्तरैकशतं महिला आत्मनः सतीत्वरक्षार्थं शिशुभिः सह कूप आत्मानं मज्जयित्वा जीवनानि व्यस्राक्षुः। सर्वतः श्रूयमाणैर्बलात्कारैरातङ्किताः पञ्चाशद् युवतीस्तासां स्वजना एव त्यक्तजीविता व्यधुः।

पिनद्धद्वार एकस्मिन् विशालाकारे गृहे वन्दिनो विधाय सप्ताधिकं त्रिशतं जनान् येषु महिला बालकाः पुरुषाश्चापि सम्मिलिता अवर्तिषत, दुर्वृत्ता मुस्लिमा जीवितानेव ज्वालयित्वावधिषुः।

देशविभाजनस्यास्मिन् विकटे क्षणे ग्रन्थिलाः स्थितीर्नियन्त्रयितुं सैन्यबलानां निष्ठा नावर्तिष्टासन्दिग्धा। सेनाध्यक्षस्य कालुष्यपूर्णेन मनसा कथं निष्पक्षतया स्थितीर्नियन्त्रयितुमशाकिषत! पञ्जाबराज्यं पशुवृत्तिभिर्मुस्लिमैः प्रवर्तिताया अव्यवस्थायाः केन्द्रमजनि। नियमव्यवस्थाया नियन्त्रणमवर्तिष्ट येषां कर्त्तव्यं त आङ्गला वाग्रहिता एव हिंसायास्ताण्डवं निरैक्षिषत। अत्र हि व्यवस्था केवलं हिंसायां बलात्कारेषु चैवादर्शि। हिंदवः सिखाश्च येषु ग्रामेषु प्रतोलीषु नगरेषु वा न्यवसन् सर्वत्रावस्कन्त्य जघन्यवृत्तयो मुस्लिमास्तानलुण्ठिषुर्विविधैरनाचारैश्च तान् स्थानं परित्यज्य पलायितुं प्राववर्तन्। तस्यां सान्निपातिक्यामवस्थायां मलिनात्मनामाङ्ग्लसैन्याधिकारिणां चिन्ताविषयस्तु केवलं भारते स्थितानामाङ्ग्लानां सुरक्षैवावित्त। तदानीं पुलिसकर्मिणामाचरणमपि गुरुण्डानामिव घृणितमेवावर्तिष्ट। मुस्लिमबहुलक्षेत्रेषु यादृशी स्थितिर्हिन्दूनामवर्तिष्ट हिन्दूबहुलेषु भारतीयक्षेत्रेषु ततोऽप्यधिकतरा कारुणिकी स्थितिरवर्तिष्ट मुस्लिमसम्प्रदायस्य नागरिकाणाम्। मुस्लिमबहुलक्षेत्रेषु संवृत्तं हिन्दूनामपमानं हिन्दूबहुलक्षेत्रेषु ते भूयोऽपि प्राबल्येन प्रतिव्यधुः। अवितथमेवोभयोः क्षेत्रयोर्मध्ये रेलयानानां यातायातं निरन्तरमस्थात् परं रेलयानेषु जनानामपेक्षया भूयिष्ठाः शवा एवादर्शिषत।

कियन्तो देशवासिनो जीवनेभ्यो वञ्चिता अभूवन्, कियन्त्यो मृत-भर्तृका युवतयो व्यलापिषुः, कियन्त्यश्चात्मनः सतीत्वरक्षार्थमात्मनो जीवनान्यहौषुः, कियन्तो बालकाः पितृविहीना अजनिषत, कियन्तो गृहा अग्निसादभूवन्, कियन्तो गृहस्था निराश्रया अजनिषत, नैतदनुमातुं शक्यते। पृथुप्रथो विधिवक्ता वयोवृद्धो दिलीपसिंहवासनमहाभागोऽस्ति मम मित्रम्। स वर्तते प्रत्यक्षद्रष्टा तस्य दृश्यस्य। स मामाचिख्यपद् यत्तस्यात्मनः कुटुम्बस्यैव सप्त सदस्या जीवनेभ्यो वञ्चिता अभूवन्। सातिशयं भयावहं कारुणिकञ्चावर्तिष्ट विभाजनस्य तद् दृश्यम्। लक्षशोऽकृतापराधानां पुरुषाणां महिलानां बालकानां वृद्धानाञ्च शवेषु निर्मितं वर्तत एतत् पाकिस्तानम्। भारतस्य स्वातन्त्र्यार्थं ये देशभक्ताः क्रान्तिकारिणो बलिदानिन आत्मनो जीवनान्यहौषुस्तैः सहैवैतेषां योगदानमपि सदैव स्मरणीयं स्थास्यति।

– पटियाला, 9781124775

क्रमशः

# गङ्गा परा देवता-३

❑ डॉ. गौतमपटेलः

चित्ते या शुभशास्त्रभावसुलभा, मुक्त्यै स्मृता मुक्तिदा
लक्ष्मीर्या बहुभव्यसाधनपरा, सौख्याय या सम्मता।
काली या परशत्रुनाशनविधौ, शक्तिर्युता सञ्ज्ञिता
सर्वासां गुणशक्तिदानकुशला, गङ्गा परा ध्यायताम्।।१।।

धात्रीं धैर्ययुतां सुधर्ममहितां, धर्मात्मिकां धर्मदां
धर्मे नित्यरतां च धर्मसकलां, धर्मात्परां धार्मिकीम्।
धर्माढ्यां शुभधर्मदानकुशलां, धर्मे रतां जाह्नवीं
धर्मध्यानपरां च धर्मनिलयां, धर्मस्य धात्रीं भजे।।२।।

ह्येतां ध्यानपरां च धैर्यधृतिदां, ध्याने स्थितां ध्येयदां
धर्मस्थां धनदां च धर्ममतिदां, ध्येयां ध्रुवां ध्यानदाम्।
धन्यां यां धरणीतितो द्युतिमयीं, ध्याने रतां ध्यानदां
धर्मश्रीवरदां च धर्मधृतिकां, गङ्गां परां भावये।।३।।

ओतप्रोतमयी सदैव मनसः, प्रत्यग्रवृत्तिं श्रिताः
गङ्गातीरमवाप्य योगनिरता, ज्ञानेऽन्वहं संगताः।
तेषां या प्रभुसाधनां बुधवरैर्लब्धुं सदा सेविता
सा मान्या शुभसार्थवाहजननी, गङ्गा परा देवता।।४।।

शान्तां शाश्वतिकीं सुशान्तिसहितां, निर्वाणशान्तिप्रदां
देवैर्लोकनुतैस्स्तुतात्मचरितां, वेदान्तवेद्यां वराम्।
गङ्गाख्यां जगदीश्वरीमभयदां, मायापरां मानिनीं
वन्देऽहं करुणाकरां मतिवरां, लोके स्थितां चोत्तमाम्।।५।।

स्वर्गे चात्र सुधामयी त्रिपथगा, पातालमध्ये स्थिता
दिव्यैर्भव्यगुणैर्विरुद्धगुणकैस्संशोभते ब्रह्मवत्।
एका नैकमयी मुदातिमधुरा, मायामयी मानिता
भूम्ना भावमयी तथा भुविगता, भागीरथी भ्राजते।।६।।

कार्यं ते प्रभुपादपद्मरुचिरप्रक्षालनेनोज्ज्वलं
स्थानं ते शिवमस्तके नहि परैरासादितं जातुचित्।
ब्रह्मा त्वां निजपात्रके सुविमले, लेभे च शान्तिं धरन्
कस्मात्त्वं वसुधातले च सकलैः, संपूजिता नो भवेः।।७।।

चक्षुः पश्यतु नेह किञ्चिदपरं, धाराप्रवाहादृते
घ्राणं जिघ्रतु ते शुभं च कमलं, स्पर्शो भवेत्ते जले।
श्रोत्रं चैव शृणोतु रम्यमधिकं, कल्लोलमालाकुलं
जिह्वायाश्च रसो भवेन्मम पुनर्ब्रह्मद्रवस्तेऽद्भुतः।।८।।

ऐशान्यां तव कोटिदेवनिवहो नृत्या सुखी नित्यदा
ह्याग्नेये गुरुबोधदर्शनपरा, नृत्यन्ति सर्वे नराः।
वायव्यां जलकेलिकोटिनिरता, नार्यो रमन्तेऽन्वहं
नैर्ऋत्यां निखिला नरा वरगुणा, ध्यायन्ति गङ्गां पराम्।।९।।

मूको वा बधिरोऽथ वामनतनुः, पङ्गुः पुनः पातकी
प्रज्ञाचक्षुरथाऽस्तु हस्तरहितो, वैक्लव्यसंपीडितः।
घोरे वा निरये नितान्तपतितो, भक्त्या क्षणं कोऽपि वा
गङ्गे त्वत्पदपूजनात् सपदि सम्प्राप्नोति दिव्यां स्थितिम्।।१०।।

कामारिं भज कंसनाशकमपि, प्राप्तुं स्थितिं श्रेयसी-
मिन्द्रादीन् व्यजनैः प्रतोषय सदा, योगे रतो वा भव।
मोक्षत्वे नहि निश्चितो भवति वै, क्लेशो हि तस्माद्भवेत्
गङ्गायां सकृदेव मज्जनमपि, श्रेष्ठां गतिं कल्पयेत्।।११।।

पात्रे यो जलमाददाति मनुजो, ब्रह्मा भवेद्भावतः
पादौ न्यस्य जनस्त्वदीयसलिले, विष्णुत्वमप्याप्नुयात्।
स्नानं त्वं यदि मस्तके भवसि भो, रुद्रो भवेद्वा नरो
ब्रह्मत्वं हरितां शिवत्वमपि वा, कोऽन्योऽस्ति दातुं क्षमः।।१२।।

सर्वानन्दकरी सदा सुखकरी श्रेयस्करी सर्वदा
सर्वं सुष्ठुकरी च सौख्यसहितं, सर्वंकरी शाङ्करी।
सर्वोत्कृष्टकरी सदा शुभकरी, सर्वं सुमेध्यंकरी
सर्वानात्ममयंकरी च सलिलं, शुद्धंकरी स्वर्णदी।।१३।।

मातस्त्वं निजबालकांश्च, सततं प्रीणासि स्वात्मायिकं
दुर्वृत्तास्तव दूषणे च निरताश्चेदप्यहो वत्सला।
पश्याम्यत्र तवैव वत्सलपरं, दिव्यं महामानसं
का माता यदि सा न भावसहिता, वत्सान् विमोक्तुं क्षमा।।१४।।

जाता या जलजान् जलैर्जरयितुं, जम्बालयुक्ते जले
जम्बालं भुवि जालजीर्णजटिले, जन्मात्मकं जीविनी।
जाता जाह्नवि जन्मजालमखिलं, तीर्णात्मकं जीविनां
जीवे जीर्णजराभयं जरयतुं, जेतुं च जन्मादिकम्।।१५।।

स्नानान्मे स्वशरीरजातमखिलं, पापं गतं सर्वत-
स्त्वन्नामग्रहणात्सदैव सुखदा, मुक्तिर्भवेत् शाश्वती।
मातस्त्वत्कृपया शरीरमनसोः, सिद्धिर्विना यत्नतो
हस्तौ द्वौ मम मोदकेन सहितौ, जातौ त्वदीया कृपा।।१६।।

आरब्धं तत्र शुद्धिकार्यमतुलं, भूपैः पुरा भारते
तस्याद्यापि विशेषरूपमधिकं, संस्थापितं वै जनैः।
वारं वारमथापि यत्नसहितं, नैवास्ति सिद्धं कथं
ये वा चात्र सदैव खण्डनपरास्ते के न जानीमहे।।१७।।

चैतन्यामृतवर्षिणीं चलजलां, चारुस्मृतिं चर्चितां
चार्वङ्गीञ्च चिदैकभावनिलयां, चिन्मात्ररूपां पराम्।
चैतन्येऽचलचित्रदानकुशलां, चित्तोज्ज्वलां चंचलां
चेतोमार्जनचन्द्रचारुचरणां, चेतोमयीं चार्चये।।१८।।

काव्यं ते रचितं मया? न च मया, भ्रान्तिर्ममास्त्यध्रुवा
यद्यच्छब्दमयं रसादिलसितं, रीत्या पुनर्गुम्फितम्।
शुद्धं वा नहि शुद्धभावसहितं, भक्त्या पुनर्भावितं
गङ्गे ते कृपया हि सर्वमधुना, सिद्धं विना यत्नतः।।१९।।

सर्वज्ञा शुभसामगानसहिता, शर्वात्मिका शाश्वती
स्नेहा सौम्यमयी समानमनसां, शान्तिप्रिया शर्मदा।
सृष्ट्यां सर्जनकार्यसिद्धिविषये, सर्वात्मना संस्थिता
सिद्धानामपि सिद्धिसाधनविधौ, सर्वप्रदा सेव्यताम्।।२०।।

'बालम' एल-१११, स्वातन्त्र्य सेनानी नगर, नवा वाडज,
अहमदाबाद-६८००१३, मो. ९९२५०११९०१

---

# उत्थापयतु जनार्दन! चक्रम्

❑ डॉ. प्रीतिः आर. पुजारा

आतङ्कवादराक्षसो भूतलेऽस्मिन् प्रजायते
यथा ध्वंसाय विश्वस्य समुद्यतो विभाव्यते।
रौद्रलीला पामराणां भस्मीकरोति निर्दोषान्
उत्थापयतु जनार्दन! हन्तुं चक्रं जरासन्धान्॥१॥

पहलगामे जघन्या सा घटना पैशाचिका घटिता
परिक्रिथितं रुधिरं मे पीडा मे पर्वतायित।
संहाररासससंतुष्टान्पाटयितुं नराधमान्
उत्थापयतु जनार्दन! हन्तुं चक्रं जरासन्धान्॥२॥

लेखनी मे जडीभूता शोकसंदिग्धं मे मनः
भुशुण्डीगोलिकारवैः स्वयं प्रकम्पितः पवनः।
सन्त्रासवादराक्षसान्विचूर्णय प्रभो कंसान्
उत्थापयतु जनार्दन! हन्तुं चक्रं जरासन्धान्॥३॥

हिंसानृत्यैःप्रकम्पिताःकश्मीरवासिनो नराः
धर्मं पृष्ट्वा हताः कान्ताः प्रियायाः सम्मुखे वराः
आततायिनामुन्मूलनेन तर्पयतु दिवङ्गतान्
उत्थापयतु जनार्दन! हन्तुं चक्रं जरासन्धान्॥४॥

संभवामि युगे युगे दत्तं वचनं त्वया नाथ!
विदीर्यते हृदयं प्रभो! जायतां हे जगन्नाथ!
वीथि-वीथिषु संरावो विशास्तु सद्यो दानवान्
उत्थापयतु जनार्दन! हन्तुं चक्रं जरासन्धान्॥५॥

- सहायकाचार्या, संस्कृतविभागः
डी.सी.एम. कला-वाणिज्यमहाविद्यालयः
वीरमगाम - अहमदाबाद- गुजरात
दूरभाषः ९४२८१२४५६६

# बालकाव्यानि

❑ डॉ. हर्षदेवमाधवः

## 1. वृक्षे वृक्षे

वृक्षाः सन्ति मार्गे मार्गे।
विहगाः सन्ति वृक्षे वृक्षे।
अस्ति कूजनं विहगे विहगे।
अस्ति मधुरता गीते गीते।
गावः सन्ति ग्रामे ग्रामे।
दधि दुग्धं च गेहे गेहे।
मत्स्याः सन्ति नीरे नीरे।
समीरः नृत्यति पर्णे पर्णे।
जलं वर्तते मेघे मेघे।
स्वप्नाः सन्ति नयने नयने।।

## 2. चञ्चा

शस्यं दृष्ट्वा हृष्यति चञ्चा।
विहगान् दृष्ट्वा क्रुध्यति चञ्चा।
टोपीं धृत्वा स्वस्य मस्तके।
क्षेत्रे शस्यं रक्षति चञ्चा।
यान्ति पयोदाः दूरं दूरम्।
चलितुं स्थानाद् इच्छति चञ्चा।।
कृषकः तं प्रति नैव पश्यति।
नैव तथापि क्रोशति चञ्चा।।
भाद्रपदस्य उष्णभास्करः।
संतापात् किं मूर्च्छति चञ्चा।।
कोऽपि कण्टकः लग्नः पादे।
अतः पीडितः खञ्जति चञ्चा।।
वपनं जातं क्षेत्रे क्षेत्रे।
कृषकं दृष्ट्वा त्वङ्गति चञ्चा।।
(त्वगि कम्पने गतौ स्वादि)

## 3. पर्यायशब्दानां गीतिः

पुष्पं वद वा कुसुमं वत्से।
कमलं लिख वा पद्मं वत्से।
चन्द्रं स्मर वा शशिनं मनसा।
तरुं पश्य वा वृक्षं वत्से।
कालं वद वा समयं नित्यम्।
अहः प्रलप वा दिवसं वत्से।।
भानुं नम वा सूर्यं प्रातः।
वनं कथय वा विपिनं वत्से।।
करं प्रणम वा हस्तं प्रातः।
श्रियं प्रणम वा लक्ष्मीं वत्से।।
सिंहं शृणु वा तत्र मृगेन्द्रम्।
वस्त्रं नय वा वसनं वत्से।।
संस्कृते पर्यायाः शब्दाः।
प्राप्नुहि विद्यां विमलां वत्से।।

## 4. ग्रामनदी मे

अति चञ्चला ग्रामनदी मे।
सदा वत्सला ग्रामनदी मे।
सदा प्रसन्ना ग्रामनदी मे।
शीतलनीरा ग्रामनदी मे।।
तीरे वृक्षाः सदैव हरिताः।
जननीकल्पा ग्रामनदी मे।।
आषाढे सा धावति शीघ्रम्।
ग्रीष्मे शान्ता ग्रामनदी मे।।
हंस-बकानां गेहं जाता।
सरला तरला ग्रामनदी मे।।

कृपया मलिनां मा कुर्वन्तु।
पुण्यसलिला ग्रामनदी मे।।

### 5. शब्दव्युत्पत्तिगीतिः

चलतः चरतः अतो हि चरणे।
शृणुतः सततम् अतो हि श्रवणे।।
जीवं हरति अतो हि हृदयम्।
चित्तं नयति अतो हि नयनम्।
वारयितुं शक्यं तद् वारि।
हरति मनो यत् तत् खलु हारि।
सदा भिक्षते अतः भिक्षुकः।
शिक्षयति सः अतः शिक्षकः।
तक्षति वृक्षान् अतः तक्षकः।
रक्षति सर्वान् अतः रक्षकः।
पालयति सः पिता हि भवति।
तारयति या सा खलु तरणी।
क्रुध्यति सततं स खलु क्रोधी।
द्रुह्यति नितरां स खलु द्रोही।
दहति सदैव अतो हि दहनः।
तप्यति नित्यं अतो हि तपनः।
धातुभ्यः जायन्ते शब्दाः।
जानन्ति ये ते खलु सुज्ञाः।।

### 6. याति

श्यामगर्दभः स्नातुं याति।
श्वेतगर्दभः गातुं याति।
पश्य मृत्तिका-भारं पृष्ठे।
शान्तगर्दभः वोढुं याति।
दृष्ट्वा नदी-प्रवाहं मार्गे।
चतुरगर्दभः तर्तुं याति।।
क्रुद्धगर्दभः अन्यगर्दभान्।
लत्ताभिः च प्रहर्तुं याति।
क्षीणगर्दभः क्षेत्रात् क्षेत्रम्।
हरिततृणानि अत्तुं याति।
तृषितगर्दभः नद्याः तीरम्।
मधुरं वारि पातुं याति।।
जले रोटिकाकल्पं चन्द्रम्।
अहो! गदर्भः लब्धुं याति।।
एते हि कृदन्ताः शब्दाः।
जानन्ति ते सुधयः बालाः।।

### 7. सङ्ख्यागीतिः

त्रयः बालकाः पठितुं यान्ति।
पञ्च ब्राह्मणाः स्नातुं यान्ति।
सप्त युवानः क्रेतुं यान्ति।
नव विद्वांसः वक्तुं यान्ति।
एकादशाः ते गातुं यान्ति।
त्रयोदशाः ते नटितुं यान्ति।
पञ्चदशाः ते योद्धुं यान्ति।
सप्तदशाः ननु पक्तुं यान्ति।
कुत्र नवदशाः भ्रमितुं यान्ति।
ऊनविंशतिः वस्तुं यान्ति।
इत्थं बालाः! विषमाः सङ्ख्याः।
ज्ञातुं लिखितुं पठितुं सरलाः।।

## षड्यन्त्रम् ( विज्ञानकथा )

बर्लीनगरस्य एकस्मिन् रहस्यमये स्थले पञ्च गुप्तचराः सङ्गणकयन्त्रस्य पटले प्रेक्ष्यमाणाः सन्ति। ते सन्ति पञ्चदेशानां गुप्तचराः। तेषु भारतदेशस्य 'रॉ' (Reserch and anylisis wing) संस्थायाः, अमेरिकादेशस्य फेडरल सिक्यूरिटी एजेन्सी नाम संस्थायाः, जर्मनदेशस्य 'बीएनडी' (बुन्देस्ना चरिचर्टेडिएन्ट) संस्थायाः, इझरायल देशस्य 'मोसाद' संस्थायाः, फ्रांस देशस्य 'फेडरल सिक्यूरिटी एजेन्सी संस्थायाः' प्रमुखाः गुप्तचराः। ते सहसा उत्थाय नृत्यन्ति। सङ्गणकयन्त्रपटले नवीना वार्ता आगता यद् अमेरिकादेशस्य धनकुबेरः 'डिलोन डस्क' इति नामकः 'हेलिकोप्टर' दुर्घटनायां मृतः। अयं विश्वस्य पञ्चमः धनकुबेरः आसीत्। अतः पूर्वं रशियादेशस्य 'क्रीस्टोफरः' नामकः धनकुबेरः समुद्रे प्लवदुर्घटनायां मृतः। चीनदेशस्य 'हेन यांग' नामकः धनकुबेरः तस्य कार्यालये विस्फोटान् मृतः। भारतस्य 'ललित अदाणी' नामकः धनकुबेरः मार्गे सहसैव द्रुतगतेः कारयानस्य दुर्घटनायां मृतः। फ्रांन्स देशस्य 'ला-बेलैक' नामकः धनकुबेरः तस्य गृहे एव अगम्यकारणवशात् पञ्चत्वं गतः।

गुप्तचराः एतान् सर्वान् जानन्ति। गुप्तचरेषु भारतीयगुप्तचरोऽवदत् हन्त! क्रियासिद्धिर्जाता। पञ्चमः नरपिशाचः अपि मृतः। अस्माकं कार्यं सम्पन्नम्। विश्वमधुना भयमुक्तं जातम्।

विश्वस्य प्रमुखदेशानां गुप्तचराः एकत्र भूत्वा कस्माद् एतान् अघ्नन् इति प्रश्नः विचारणीयः? त्रिवर्षेभ्यः पूर्वं सान्फ्रांसिस्को नगरे एकं विश्वधन-कुबेराणां वाणिज्यविषयकं सम्मेलनमभवत्। ते सर्वे विश्वस्य दुर्दशाविषये चिन्तिताः आसन्। सर्वत्र महार्घता वर्धते स्म। खाद्यवस्तूनां न्यूनतापि अलक्ष्यत। वस्तूनां यावत् उत्पादनमभवत् तावत् तस्य विक्रयो नाऽभवत्। अतः विश्वस्य अर्थव्यवस्था असमीचीना आसीत्। 'डिलोन डस्क' महोदयः धनकुबेराणां प्रमुखः आसीत्। सः पत्रकारपरिषदि घोषणां कृतवान् यद्, विश्वस्य अर्थव्यवस्थायाः, दुर्दशायाः कारणं जनसंख्याविस्फोटः अस्ति। यावती जनसंख्या वर्धते, तावती तेषां मरणसंख्या नास्ति। अधुना जनानां जीवनकालः वृद्धिं गतः। अतः विश्वस्य देशैः जनसंख्यां नियमितुं प्रयत्नः कर्तव्यः, इति। सम्मेलनं तु पूर्णतां गतः। ततः पश्चाद् अष्टमासाः व्यतीताः। सहसैव चीनदेशात् कापि महामारी समुत्पन्ना। वायुवेगेन सा महामारी विश्वस्मिन्नपि विश्वे प्रासरत्। केवलं मासत्रयावधौ अगणिताः मानवाः प्राणिनः च पञ्चत्वं गताः। समग्रापि अर्थव्यवस्था भग्ना। विश्वस्य वैज्ञानिकैः असङ्ख्याः प्रयोगाः कृताः। किन्तु रोगः अयं अगम्यः आसीत्। प्रतिदिनं रोगो वर्धते स्म। विश्वस्य सर्वे देशाः अर्थाभाववशाद् अनर्थतां गताः। तदा पुनरपि एतेषां धनकुबेराणां सम्मेलनमभवत्।

सर्वैः धनकुबेरैः विश्वं त्रातुम् एका योजना उद्घोषिता। तैः सर्वदेशेभ्यः पञ्च डोलरमितेन कुसीदेन (सरलवृद्धिरूपेण गृहीत्वा) धनं ऋणबन्धरूपेण दातुं कुसीदेन निश्चयः कृतः। तैः विश्व-आरोग्यसंस्थायै अपि ऋणबन्धः दत्तः। तदैव चीनदेशस्य एकेन औषधानुसन्धानकेन्द्रेण एनं रोगं नाशयितुं किञ्चिदौषधं निर्मितम्। विश्वआरोग्यसंस्थया इदमौषधं सर्वेभ्यो देशेभ्यो विना मूल्यं प्रदत्तम्। इत्थं रोगः नियन्त्रितः जातः।

ततः पश्चात् पञ्चमासेभ्यः विश्वस्य राजनीतिज्ञानां एकं गुप्तं सम्मेलनं जातम्। ते सर्वे सहसैव महामारीणां समुद्भवं ज्ञातुं व्यचारयन्। गुप्तचरसंस्थाभिः ज्ञातं यद् वस्तुतः महामार्यो धनकुबेराणां षड्यन्त्रवशात्समुत्पन्नाः। ते गुप्त-प्रयोगान् कारयित्वा महामार्याः विषाणून् उत्पादितवन्तः। महामारीवशात् सर्वे देशाः निर्धनाः भवेयुः। समृद्धदेशाः अपि ऋणबन्धान् स्वीकर्तुं परवशाः भवेयुः। धनकुबेराः परोपकारिणः भूत्वा धनं दत्त्वा धनवृद्धिं कृत्वा अधिकतराः समृद्धाः भवेयुरिति तेषां गुप्तविचारणा आसीत्। अतः पञ्चदेशानां गुप्तचराः तान् नरपिशाचान् हन्तुं एकत्र जाताः। तैः शनैः शनैः पञ्चधनकुबेराणां नाशो विहितः।

जर्मनीदेशस्य गुप्तचरः अवदत् 'समग्रं विश्वं स्वार्थपङ्कमग्नं जातम्। एते धनाढ्याः धनवृद्धिं कर्तुं विश्वस्य प्रजानां नाशं कृतवन्तः। रोगाणामुपयोगः विज्ञानप्रयोगैः रोगमुत्पाद्य प्रजानां नाशार्थमभवत्। एतैः पृथिव्यामेव नरकमानीतम्। वयस्याः अस्माकं कार्यं सम्पन्नम्। ईश्वरं प्रार्थयन्तु यत् पुनरपि अन्यान् नरपिशाचान् पञ्चत्वं गमयितुम् अस्माकं मेलनं न भवेत्।'

– डॉ. हर्षदेवमाधवः
8, राजतिलक बंगलोज, ममता होस्पिटल के सामने, आबादनगर बस स्टोप समीप, बोपल, अहमदाबाद-380058

## ऐसे बन सकते हैं आप भारती पत्रिका के ग्राहक :-

भारती पत्रिका का वार्षिक शुल्क रुपये 250/-, पंचवर्षीय शुल्क 1100/-, आजीवन सदस्यता (15 वर्ष) शुल्क 3100/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम - **भारतीयसंस्कृतप्रचारसंस्थान**
खाता संख्या - **21391019124 98**
**IFS Code - CNRB0002139**

# स्वातन्त्र्योत्तरश्रीहरिश्रेष्ठमहाकाव्यस्य परिचय एवं रसयोजनाया: विवेचनम्

❑ अर्चना शुक्ला

प्रस्तावना- संस्कृतमहाकाव्यसर्जनाया आधुनिकयुगे भारतीयस्वातन्त्र्यं केन्द्रबिन्दुः वर्तते। स्वातन्त्र्यात् पूर्वमेव संस्कृतसर्जनायाः यः पुनर्जागरणकालः प्रारभत तदारभ्य महाकाव्यानां सर्जनाया अपि शुभारम्भः सम्बभूव। स्वाधीनतान्दोलनस्य पृष्ठभूमौ संस्कृतसाहित्ये अभिनवभावबोधः तीव्रसंवेदना च सम्प्रविष्टे। इदमपि महाकाव्यं श्री वनमालिदास-शास्त्रिणैव विरचितमस्ति। अस्य महाकाव्यस्य रचनाकालः 1975 ईशवीयाब्दो वर्तते। अस्य प्रकाशनं 1976 तमे ईशवीयाब्दे भारतसर्वकारस्य मानवसंसाधनविकासमंत्रालयेन प्रदत्तसाहाय्येन समभवत्। इदं महाकाव्यम् अष्टादशसर्गात्मकम् अस्ति। अत्र 1092 श्लोकाः वर्तन्ते। इदमपि चरितकाव्यमेवास्ति। अस्मिन् कविना स्वकीय सतीर्थ्यस्य श्रीहरिदासस्य जीवनचरितमुपनिबद्धं प्राप्यते। महाकाव्यस्य मंगलाचरणं भक्तिपरकमस्ति, गुरुजनान् प्रति श्रद्धाया अभिव्यक्तिरपि सविशेषा दृश्यते-

**श्रीरामकृष्णपदपंकजलीनचित्तान्**
**भक्तौ नियोज्य हरिभक्तिविहीनचित्तान्।**
**ये नास्तिकानपि च सास्तिकताकचित्तान्**
**कृत्वा हरेः पदमयुः प्रथमं क्वचित्तान्।।**
**दीक्षागुरुनिह प्रणम्य ततो गणेशं,**
**वाणीं निधाय हृदयेऽपि च रामकृष्णौ।**
**आनन्दतीर्थमपि गौरहरिं च नित्या-**
**नन्दं च रामहरिदासकृतं ब्रवीमि[1]।।**

महाकाव्यस्यास्य प्रथमसर्गे नायकस्य हरिदासस्य जन्मबाल्यवयश्च वर्णिते स्तः। द्वितीयसर्गे तदीयशिक्षाग्रहणस्य, तृतीयसर्गे विवाहस्य, चतुर्थसर्गे वैराग्यस्य चोपक्रमो विहितः। पञ्चमसर्गे नायकस्य गंगातटे गमनं तीर्थस्नानादिकृत्यं च वर्णितमस्ति। षष्ठसर्गे सद्गुरोः प्राप्तिविषयकी चिन्ता, सप्तमसर्गे अध्यापकपदाद्वैराग्यस्य, अष्टमसर्गे भगवद्भक्तौ तत्परतायाश्च वर्णनानि प्राप्यन्ते। नवमसर्गे गुरुसम्प्राप्तिः, दशमसर्गे गुर्वाज्ञया पुनरध्ययनं, एकादशे सर्गे भजनार्थप्रयाणं, द्वादशे सर्गे प्रासंगिकतया वर्षर्तुवर्णनं चोपनिबद्धानि वर्तन्ते। त्रयोदशे सर्गे श्रीकृष्णदर्शनार्थं तपश्चरणस्य, चतुर्दशे सर्गे विविधाभिलाषाणां प्रस्तुतीकरणस्य, पञ्चदशे सर्गे कृष्णबलरामदर्शनस्य, षोडशे सर्गे कविना सह मिलनस्य, सप्तदशे सर्गे गुरोरन्तर्धानलीलायाः, अष्टादशे सर्गे च हरिप्रेष्ठस्य उपदेशानां वर्णनानि प्रस्तुतानि सन्ति। तदुपदेशविधेरुदाहरणमेवंप्रकारेण द्रष्टुं शक्यते -

**बाल्ये बालविलासहासमतिना मातुः पयः पीयते,**
**तारुण्ये तरुणीविलासमतिना कान्ताधरः पीयते।**
**वार्धक्ये बहुचिन्तयाऽल्पमतिना चिन्तारसः पीयते,**
**नो केनापि मुकुन्दलीनमतिना नामामृतं पीयते[2]।।**

महाकाव्येऽत्र महाकवेः वनमालिदासस्य भाषा प्रौढा, प्रवाहमयी, मृदुपदाढ्या चास्ति। अत्र व्याकरणिकप्रयोगा अपि सुललिता विशेषाश्च सन्ति। विविधैश्छन्दोऽलंकारैर्युक्तमिदं काव्यं क्वचित् वैदर्भीं, क्वचित् पाञ्चालीं, क्वचित् गौडीमावहति। अत्र

व्यावहारिकसूक्तीनां प्रयोगा अपि बाहुल्येन प्राप्यन्ते[3]।

यथा – '**द्रुतं विधेयं विद्धीतनो यमः।**'

'**प्रतीक्षतेऽनेन कृतं न नाकृतम्।**'

'**न नियतिं क्रमितुं क्षमते जनः।**'

'**भवति यस्य स एव जनो महान्।**'

इत्यादि। काव्योचितानां गुणानामलंकाराणां प्रयोगोऽप्यत्र दुर्लभो नास्ति। अलंकृता काव्यशैली अपि शाब्दबोधाय दुष्करा नास्ति। भाषागतं सारल्यं पाठकानां मनस्सु प्रभावं जनयति। हरियाणाप्रदेशीय संस्कृतसाहित्यसर्जनाया इतिहासे अस्य महाकाव्यस्य विशिष्टं स्थानम् अस्ति।

रसयोजना– रसतत्त्वं काव्यस्य प्राणभूतं तत्त्वं भवति, अतएव महाकाव्यकाराणामपि सर्वाधिकम् अवधानं रससन्निवेशे एव सन्निहितं भवति। रस एव सहृदयस्य हृदये आह्लादं जनयति। महाकाव्यं वस्तुयोजनानुसारं रसविशेषमधिकृत्य काव्यरचनायै प्रवर्तते। स रसः अङ्गीरसो मन्यते। सम्पूर्णमहाकाव्ये अयमेव रसः प्राधान्यमुपैति। एनं प्रधानभूतम् अङ्गीरसमेव पोषयितुमन्येषां तदङ्गभूतानां रसानां योजना महाकाव्येषु विधीयते। अतएव काव्यशास्त्रे 'एक एव रसस्त्वङ्गी' 'अङ्गमन्ये रसाः सर्वे' इत्याद्युल्लेखाः महाकाव्यलक्षणे निर्दिष्टा उपलभ्यन्ते। अनेकधा स्पष्टीभवति यत् रसयोजना महाकाव्ये विशिष्टा भवति। सरसत्वादेव काव्यं रोचकं प्रतिभाति। काव्यरसं चापि नाट्यरसमिव काव्यपाठकानामास्वाद्यं भवति। तेनैव रसस्य अलौकिकता प्रतीयमाना भवति।

महाकाव्ये प्रयोज्येष्वङ्गिरसेषु वीरशृंगारयोरुल्लेखः परम्परया प्राप्यते। कालान्तरे करुणरसं शान्तरसं चाप्यधिकृत्य महाकाव्यानि रचितानि। एवं च एते रसचतुष्टयम् अङ्गित्वेन प्रयोज्यं विज्ञातव्यम्। अन्येऽङ्गरसाः स्युः, किन्तु अङ्गिरसेन सह तेषां विरोधः नैव प्रतीयमानः स्यात्। एवं चेद् यत्र विरोधिरसयोजनायाः प्रासंगिकता स्यात् तत्र विरुद्धत्वं न प्रतीयते इति विषये कवेर्यत्नो वाञ्छनीयो भवति।

'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति[4] भरतसूत्रानुसारं महाकाव्ये रसपरिपाकाय रसानुकूलानां विभावानाम् अनुभावानाम् व्यभिचारिभावानां चापि योजना करणीया भवति। एभिः पुष्टस्य स्थायिभावस्य माध्यमेन रसं निष्पादयितुं महाकविरेव समर्थो भवति न तु सामान्यकविः। काव्यशास्त्रकारैः महाकवीनां रसयोजनायाः उत्कृष्टं स्वरूपं संविचार्यैव प्रत्येकं रसानां विभावादयः प्रतिपादितास्तल्लक्षणेषु। तद्यथा विज्ञेया नवानां रसानां यथोद्दिष्टक्रमेण-

(1) शृंगार रसः –कामोद्भेदादुत्पद्यमानोऽयं रसः।

अत्र नायकनायिकाप्रभृतयः आलम्बनविभावा भवन्ति। चन्द्रदर्शनं, उपवनविहारः, वसन्तादिऋतुविशेषोल्लासप्रभृतय उद्दीपनविभावा भवन्ति, भ्रूविक्षेपकटाक्षादय अनुभावा भवन्ति। स्वेदरोमाञ्च लज्जौत्सुक्यादयश्च व्यभिचारिभावाः भवन्ति।

एभिः परिपुष्टा कान्ताविषयकरतिः स्थायीभावो भवति। शृंगारस्यापि द्वौ भेदावभिमतौ-संयोगः, विप्रलम्भश्च।

अनयोः संयोगः नायकनायिकयोः साहचर्यसापेक्षो भवति। विप्रलम्भस्तु नायकनायिकयोः साहचर्य सापेक्षो न भवति। स च महाकाव्यादौ अभिलाषेर्ष्यामानप्रवासादिभेदादनेकविधो विन्यस्यते।

(2) वीररसः – चेतस उद्दीपनाज्जायमानोऽयं रसो

वीरसंज्ञ:। अस्मिन् रसे विजेतव्यशत्रुप्रभृतय: आलम्बनविभावा: भवन्ति। तेषां विजेतव्यानां चेष्टादयश्च उद्दीपनविभावा: भवन्ति। रोमाञ्च सहायान्वेषणप्रभृतय अनुभावा: भवन्ति। गर्वधृति मतिस्मृतितर्कादयश्च व्यभिचारिणो भवन्ति। एभि: पुष्ट उत्साह: स्थायी भाव: सन्निवेशनीयो भवति।

यथोक्तम् -

**उत्तमप्रकृतिर्वीर: उत्साहस्थायिभावक:।**
**आलम्बनविभावास्तु विजेतव्यादयो मता:।।**
**विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिण:।**
**अनुभावास्तु तत्र स्यु: सहायान्वेषणादय:।**
**संचारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चा:**[५] ।।

वीररस: दानधर्म-युद्धदयाभेदात् चतुर्विध: भवति। तत्र दानाय सोत्साहं प्रवृत्तस्य नायकस्य तद्विषयकघटनावर्णने दानवीर: भवति। एवमेव धर्मे सोत्साहं प्रवृत्तस्य तद्विषयकघटनावर्णने धर्मवीर:, युद्धे सोत्साहं प्रवृत्तस्य तद्विषयकघटनावर्णने युद्धवीर:, दयायां सोत्साहं प्रवृत्तस्य तद्विषयक-घटनावर्णने दयावीर: प्रस्तूयते।

(३) करुणरस: - द्रवीभावातिशयादुत्पद्यमानोऽयं रस:। अस्मिन् रसे इष्टविनाश: अनिष्टाप्तिर्वा आलम्बनविभावत्वेन वर्ण्यते। इष्टगुणानुकथनादीनि उद्दीपनानि भवन्ति। कम्प-भय-प्रलाप-रुदन-स्तम्भ-वैवर्ण्य- प्रभृतय: अनुभावा भवन्ति। स्वप्नापस्मारदैन्यादयश्च व्यभिचारिणो भवन्ति। एभि: पुष्ट: शोक इत्यस्य स्थायिभावो भवति।

यथोक्तम् -

**इष्टनाशादनिष्टाप्तौ शोकात्मा करुणोऽनु तम्**
**निश्वासोच्छ्वासरुदितस्तम्भप्रलपितादय:।**
**स्वापापस्मारदैन्याधिमरणालस्यसम्भ्रमा:।**
**विषादजडतोन्मादचिन्ताद्या व्यभिचारिण:**[६] ।।

(३) शान्तरस: - सांसारिकभावोपशमोद्भूत: शान्त इत्याख्यो रसोऽपि महाकाव्येष्वङ्गित्वेन ग्राह्योऽभवत्। अस्मिन् शान्तरसे संसारस्य निस्सारता-अनित्यादिविषयाणां बोध एव आलम्बनविभावो भवति। तीर्थ-पुण्याश्रम-रमणीयारण्यानि प्रभृतयश्च उद्दीपनविभावा भवन्ति। रोमाञ्चादयश्च अनुभावा भवन्ति। निर्वेद-हर्ष-दया-धृति-मतिप्रभृतयो व्यभिचारिणो भवन्ति। एभि: पुष्ट: शम इत्याख्य: स्थायिभावश्च योज्यते। यथोक्तम् साहित्यदर्पणे -

**शान्त: शमस्थायिभाव: उत्तमप्रकृतिर्मत:।**
**अनित्यवादिनाऽशेषवस्तुनिस्सारता तु या।।**
**परमात्मस्वरूपं वा तस्यालम्बनमिष्यते।**
**पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादय:।।**
**महापुरुषसंगाद्यास्तस्योद्दीपनरूपिण:।**
**रोमाञ्चाद्यनुभावास्तथा स्युर्व्यभिचारिण:**
**निर्वेदहर्षस्मरणमतिभूतदयादय:**[७] ।।

अन्येऽङ्गभूतरसा भवन्ति। तेषु रौद्र-रस: अद्भुतरसश्च वीररसस्य अङ्गभूतौ वर्णितुं शक्येते। हास्यं क्वचित् शृंगारस्याङ्गभूत: वर्णितुं शक्यते। प्रकारान्तरेण भयानकरस: वीभत्सरसश्चापि वीरस्य अङ्गभूत: स्थापयितुं शक्यते। अद्भुतरस: करुण-शान्तयोरप्यङ्गभूत: वर्णितुं शक्यते। वात्सल्यर-सोऽपि क्वचित् करुणस्याङ्गरूपेण योजयितुं शक्यते। एवमेव च भक्तिरसोऽपि क्वचिच्छान्तस्याङ्गरूपेण योजयितुं शक्यते।

**निष्कर्ष:** - स्वातन्त्र्योत्तरं संस्कृते श्रीहरिश्रेष्ठमहा-काव्यस्य पर्याप्तं युगीनता अस्ति। अतएव युगबोधस्य दृष्ट्या जनचेतना, समाजचेतना, राष्ट्रचेतनादीनां

दृष्टिकोणेन स्वातन्त्र्योत्तरसंस्कृतश्रीहर्हि श्रेष्ठमहा-काव्यस्य उपादेयता वक्तुं शक्यते। यतोहि अत्र सर्वत्र यथार्थस्य प्रस्तुतिरवलोक्यते प्राचीनसंस्कृतसाहित्ये आदर्शस्थापनादृष्ट्या सर्जनाया: प्रतिष्ठा दृश्यते, किन्तु स्वातन्त्र्योत्तरसंस्कृते श्रीहरिश्रेष्ठमहाकाव्यस्य यथार्थ-स्य प्रस्तुतीकरणदृष्ट्या सर्जनाया: प्रतिष्ठा लक्ष्यते। स्वातन्त्र्योत्तरसंस्कृते श्रीहरिश्रेष्ठ-महाकाव्यस्य निरुद्देश्यं नास्ति। वर्तमाने यान्यपि रचनाकार्याणि विधीयन्ते विधास्यन्ते च तानि युगबोधाय युगप्रवृत्तीनां विकासाय संस्कृतभाषा-साहित्यस्य विकासाय स्वीकार्यं महत्त्वं प्रकटयन्ति इत्यत्र संशयो नास्ति। श्रीहरिश्रेष्ठमहाकाव्यं भावोन्मेष-भावसूक्ष्मता-चित्रणादिमाध्यमेन मानवानां सम्यग् मार्गदर्शनं करोति। अत्र गहनचिन्तनमनपेक्ष्य सहजतात्पर्यबोध एव रचनाकाराणां लक्ष्यम् भवति। अतएव यावत् शीघ्रं पाठक: श्रोता वा भावाधिगमं कर्तुं शक्नोति। एवं युगस्यावश्यकताया: सम्पूर्तिरप्यत्र स्फुटं दृश्यते। इदं संस्कृतसर्जनाया प्रवृत्तिगतं विकासं लक्षीकरोति, अतएवानेन स्वातन्त्र्योत्तरसंस्कृतसर्जनाया: विकासस्य मूलाधाराणां प्रवृत्तिगतानामभिवृत्तीनां सम्यग् ज्ञानं भविष्यति।

– शोधच्छात्रा, (साहित्यविभाग:),

ज.रा.राजस्थानसंस्कृतविश्वविद्यालय:, जयपुरम्

**सन्दर्भग्रन्था:-**

1. श्रीहरिश्रेष्ठमहाकाव्यम् – 1/1,2
2. श्रीहरिश्रेष्ठमहाकाव्यम् – 17/46
3. अर्वाचीनसंस्कृतम् – 4/3,( जुलाई 1982 )
4. भरतनाट्यशास्त्रम् – अ.06/ पृ.383
5. साहित्यदर्पणम् – 3/232–234
6. दशरूपकम् – 4/81,82
7. साहित्यदर्पण:, 3/245–49



नारी-स्तम्भः

# पद्ममालिनी कुमुदिनी लखिया

❑ डॉ. राजेश्वरी भट्टः

भारतीय कत्थकनृत्यकलाक्षेत्रे मनोहारिणा चमत्कृतिजन्येन च प्रदर्शनेन विश्वे विश्रुता राष्ट्रस्य सर्वोच्चेन द्वितीय, तृतीय एवं चतुर्थेन दुर्लभेन पद्मपुरस्कारेणाङ्लंकृता, कीर्तिशेषा नृत्याङ्गना कुमुदिनी लखिया राष्ट्रस्य विशिष्टा विभूति-र्विद्यते। आजीवनं नृत्यकलायै समर्पिता, कत्थकनृत्यस्य पर्यायरूपेण प्रशस्ता कुमुदिनी लखिया युगयुगेभ्यः स्मरणीया वर्तते। कत्थक नृत्यक्षेत्रे नवनवप्रयोगेण रमणीयतां विदधती कुमुदिनी लखिया 17 मई 1930 तमे वर्षे अहमदाबादनगरे संगीताराधके परिवारे जनि-मलभत। संगीतनृत्यादीनां कलानां संस्कारान् कुमुदिनी संगीताराधिकाया मातुः सन्निधौ प्राप्तवती। सततं संगीतमये परिवेशे निवसन्त्या बालिकायाः रुचिरनुदिनं कलामयी जाता। सप्तवर्षवयस्येव कुमुदिनी जयपुरकत्थकशैल्या-मधिगतप्रावीण्यस्य पं. सुन्दरलालमहाभागस्य सन्निधौ कत्थकनृत्यस्य प्रशिक्षणं प्राप्तवती। तत आत्मनोऽभीप्सितार्थमधिगन्तुं कुमुदिनी वाराण-स्यां वास्तव्यस्य नृत्यगुरोः आशिकहुसैनस्य शिष्यत्वे कत्थकनृत्यस्य गूढरहस्यान् प्राप्तवती। इयताऽपि असन्तुष्टा कुमुदिनी अधिकाधिकं नृत्यकौशलं प्राप्तुं नृत्यक्षेत्रे शीर्षस्थस्य राधेलालमिश्रमहोदयस्य निर्देशने नृत्यस्य प्रशिक्षणं प्राप्तवती। सौभाग्येन कुमुदिनी लखिया नृत्याचार्यस्य 'बिरजूमहाराजस्य' एवं कत्थकसम्राजः 'शम्भूमहाराजस्य' छत्रछायायां कत्थकनृत्यस्य सूक्ष्मभावानां गति-लय-तालादीनां विषये पारंगताऽभवत्। सम्प्रति नृत्यकलायां निष्णाता कुमुदिनी नृत्यकला-विशेषज्ञानां रसिकानां च आमन्त्रणेन देशेषु विदेशेषु नृत्यप्रदर्शनेन प्रभूतां कीर्तिमकलयत्। सप्ततिवर्षाणि यावत् मनोहारिणा नृत्यप्रदर्शनेन विश्वस्मिन् विश्वे प्रशंसनीया जाता। 1964 तमे वर्षे कुमुदिनी अहमदाबादनगरे कदम्बकेन्द्रस्य स्थापनां कृतवती। सीमितछात्रैः सह सञ्चालितेयं नृत्यसंस्था संस्थापिकाया कुमुदिन्याः अध्यवसायेन दृढसंकल्पेन, आत्मबलेन च अनेकेषां छात्राणां कृते कल्पवृक्ष इव सिद्धिदायिन्यभवत्। कुमुदिनी लखिया यथा नृत्यक्षेत्रे अनन्याऽऽसीत् तथैव कोरोग्राफी क्षेत्रेऽपि अद्वितीयाऽऽसीत्। 1973 तमे खिष्टाब्दे कुमुदिनीलखिया 'कोरियोग्राफी' क्षेत्रे उत्कृष्ट-प्रदर्शनेन चलचित्रेषु नाटकेषु अनिवार्या जाता। नृत्यस्य समुचितव्यवस्थाया माध्यमेन कुमुदिनी कोरोग्राफीक्षेत्रे प्रशंसनीया आसीत्। 'उमराव-जान' इति लोकप्रिये चलचित्रे कुमुदिन्याः कोरोग्राफी भव्या आसीत्। नृत्यक्षेत्रे नदीष्णा

'कुमुदिनीलखिया' श्रेष्ठनृत्यकौशलेन राष्ट्रस्य नैकेषु प्रतिष्ठितनृत्यसंगीतसंस्थानेषु उच्चपदे स्थिता कत्थकनृत्यस्य विकासाय प्रयत्नमकरोत्। गुजरातराज्ये संगीतअकादम्या अध्यक्षपदे स्थिता कुमुदिनी कत्थकनृत्ये आधुनिकतायाः समावेशाय प्रयत्नशीला आसीत्। संगीतनाटक अकादम्याः सदस्यरूपेण कुमुदिनी लखिया कत्थकनृत्ये 'सामूहिकतायाः' समर्थनमकरोत्। न केवलं भारतदेशे अपितु गोलार्द्धद्वये कत्थकनृत्यक्षेत्रे कुमुदिन्या योगदानं अविस्मरणीयमस्ति। नृत्यजगति अपूर्वयोगदानस्य कृते कुमुदिनीलखिया भूयोभूयः सम्मानिता जाता। विस्तारभयेनात्र केचिदेव विशिष्टा पुरस्कारा उल्लिख्यन्ते –

1. 1987 वर्षे पद्मश्रीः सर्वोच्चश्चतुर्थो नागरिकपुरस्कारः।
2. 2010 वर्षे पद्मभूषणम् सर्वोच्चाः तृतीयनागरिकपुरस्कारः।
3. 2025 वर्षे पद्मविभूषणम् सर्वोच्चः द्वितीयः नागरिकपुरस्कारः।
4. संगीतनाटक अकादमी पुरस्कारः।
5. गौरवपुरस्कारः गुजरातसर्वकारेण।
6. कालिदास सम्मानो मध्यप्रदेशस्य।
7. भारतखण्डे पुरस्कारो लखनऊतः।

आजीवनं नृत्यविकासाय जीवन्ती कुमुदिनीलखिया 95 वर्षवयसि नश्वरं शरीरं विहाय 12 अप्रैल 2025 तमे ख्रिष्टाब्दे दिवं प्रयाता। कत्थकनृत्यक्षेत्रे अग्रगण्यायाः कुमुदिन्या निधनं राष्ट्रस्य अपूरणीया क्षतिः वर्तते।

## हिन्दी अनुवाद

भारतीय कत्थक नृत्य कला के क्षेत्र में मनोहारी एवं विस्मित कर देने वाले प्रदर्शन से विश्व में प्रसिद्ध राष्ट्र के सर्वोच्च एवं दुर्लभ द्वितीय, तृतीय एवं चतुर्थ इन तीनों 'पद्म' नागरिक पुरस्कारों से पुरस्कृत कीर्तिशेष नृत्याङ्गना 'कुमुदिनी लखिया' राष्ट्र की विशिष्ट विभूति हैं। आजीवन नृत्यकला के लिए समर्पित, कत्थक नृत्य के पर्याय के रूप में प्रशस्त कुमुदिनी लखिया युग युगों तक स्मरणीया हैं। कत्थक नृत्य क्षेत्र में नये-नये प्रयोगों से रमणीयता का सञ्चार करने वाली कुमुदिनी लखिया का जन्म 1930 ई. में अहमदाबाद नगर के संगीत प्रेमी परिवार में हुआ था। संगीत नृत्यादि कलाओं के संस्कार कुमुदिनी ने अपनी संगीताराधिका माता से प्राप्त किए थे। निरन्तर संगीतमय परिवेश में समय व्यतीत करने वाली बालिका कुमुदिनी की रुचि दिनोंदिन संगीत नृत्यादि की ओर प्रवृत्त होने लगी। सात वर्ष की आयु में ही 'कुमुदिनी' ने जयपुर 'कत्थक घराने' के कत्थक नृत्य विद्या में प्रवीण पं. सुन्दरलाल की सन्निधि में नृत्य का प्रशिक्षण प्राप्त किया। तत्पश्चात् अपने मनोरथ की प्राप्ति के लिए कुमुदिनी ने 'वाराणसी' के नृत्यगुरु आशिक हुसैन की शिष्या के रूप में कत्थक नृत्य के सूक्ष्म भावों की प्रस्तुति का प्रशिक्षण प्राप्त किया। इतने से भी सन्तोष न होने पर

कुमुदिनी ने अधिक प्रवीणता प्राप्त करने के लिए नृत्य क्षेत्र में शीर्षस्थ पं. राधेलाल मिश्र के निर्देशन में नृत्य का प्रशिक्षण प्राप्त किया। सौभाग्य से कुमुदिनी लखिया नृत्याचार्य 'बिरजूमहाराज' एवं कत्थक सम्राट 'शम्भू महाराज' की छत्रछाया में कत्थकनृत्य के सूक्ष्म भाव, गति एवं लय आदि विषयों में पारंगत हो गई। नृत्यकला में निष्णात कुमुदिनी अब नृत्य कला विशेषज्ञों एवं रसिकजनों के आमंत्रण पर देश-विदेश में सम्पन्न नृत्य महोत्सवों में अपने नृत्य-कौशल से विख्यात हो गई। सत्तर (70) वर्षों तक अपने मनोहारी नृत्य प्रदर्शन से विश्रुत कुमुदिनी ने 1964 ई. में अहमदाबाद नगर में 'कदम्ब केन्द्र' की स्थापना की। सीमित छात्रों के सहयोग से सञ्चालित यह नृत्य संस्था संस्थापिका कुमुदिनी लखिया के दृढ़ परिश्रम, सत्संकल्प, आत्मबल एवं पूर्णनिष्ठा के कारण अनेक छात्रों के लिए कल्पवृक्ष की भांति सिद्धिदायिनी है। नृत्यकला में अनन्या कुमुदिनी **कोरोग्राफी** की कला में भी अद्वितीया थी। नृत्य में कोरोग्राफी की श्रेष्ठता के कारण कुमुदिनी ने 'उमराव जान' नामक चलचित्र में पर्याप्त प्रशंसा प्राप्त की। अपने श्रेष्ठ नृत्य कौशल के कारण कुमुदिनी लखिया ने राष्ट्र के अनेक प्रतिष्ठित नृत्य संगीत संस्थानों में उच्च पद पर कार्य करते हुए राज्य संगीत अकादमी के अध्यक्ष पद पर आसीन कुमुदिनी ने कत्थक नृत्य के विकास के लिए पूर्ण प्रयत्न किया। 'संगीत नाटक अकादमी' के सदस्य के रूप में कुमुदिनी ने कत्थक नृत्य में सामूहिकता का समर्थन किया। न केवल भारत में अपितु विश्व के दोनो गोलार्द्ध में कत्थक जगत् में अपनी सेवा एवं योगदान के लिए कुमुदिनी समस्त विश्व में बार-बार सम्मानित हुई हैं। विस्तार के भय से उनकी सम्मानमाला के कुछ ही मोती यहाँ प्रस्तुत हैं -

1. 1987 ई. में 'पद्मश्री' सर्वोच्च चतुर्थ नागरिकपुरस्कार।
2. 2010 ई. में 'पद्मभूषण' सर्वोच्च तृतीयनागरिक पुरस्कार।
3. 2025 ई. में 'पद्मविभूषण' सर्वोच्च द्वितीय नागरिक पुरस्कार।
4. संगीत नाटक अकादमी पुरस्कार।
5. गौरव पुरस्कार, गुजरात सरकार द्वारा।
6. कालिदास सम्मान, मध्यप्रदेश द्वारा।
7. भारतखण्डे पुरस्कार, लखनऊ से।

आजीवन नृत्य के विकास के लिए संघर्षशीला कुमुदिनी लखिया 95 वर्ष की आयु में नश्वर शरीर को छोड़कर 12 अप्रैल 2025 को दिवंगत हो गई। नृत्य क्षेत्र में अग्रगण्या कुमुदिनी लखिया का निधन राष्ट्र की अपूरणीया क्षति है।

- पूर्व विभागाध्यक्षा (संस्कृतविभागे)
लालबहादुरशास्त्री कॉलेजः, तिलकनगरम्,
जयपुरम्।

आयुर्वेद-स्तम्भः

# सर्वदा स्मृतिमास्थाय योगमनुष्ठेयम्

❑ प्रो. बनवारीलालगौडः
राष्ट्रपतिसम्मानितः, पूर्व-कुलपतिः

**मनो मनोर्थो बुद्धिरात्मा चेत्यध्यात्मद्रव्य-गुणसङ्ग्रहो वर्तत इति कथयति महर्षिश्चरकः। एष एव शुभाशुभप्रवृत्तिनिवृत्तिहेतुर्भवतीति निर्दिशत्याचार्यः। चरकसंहितायां शरीरमिदं चतुर्विंशतितत्त्वात्मकमेव निर्दिष्टम्। यथा हि-**

**पुनश्च धातुभेदेन चतुर्विंशतिकः स्मृतः। मनो दशेन्द्रियाण्यर्थाः प्रकृतिश्चाष्टधातुकी।। (च.सं. 1/17)**

महर्षि चरक कहते हैं कि 'मन, मन के अर्थ (विषय), बुद्धि तथा आत्मा' –इन सबका जो समूह है, वही अध्यात्म से सम्बन्धित द्रव्य और गुणों का संग्रह है। यही शुभ तथा अशुभ प्रवृत्तियों की उत्पत्ति और निवृत्ति का कारण बनता है, ऐसा आचार्य निर्दिष्ट करते हैं। चरकसंहिता में यह शरीर चतुर्विंशति (24) तत्त्वों से युक्त बताया गया है, जैसे कि –

पुनः धातुओं के भेद से यह (पुरुष) चतुर्विंशति तत्त्वों वाला कहा गया है – 'मन, दश इन्द्रियाँ, अर्थ (5 शब्दादि विषय) तथा आठ तत्त्वों वाली प्रकृति।' (चरकसंहिता, शारीरस्थान 1/17)

**अत्र हि मनसः पृथग्गणनां कृत्वा दशेन्द्रियाणीति यन्निर्दिष्टं तत्तु पञ्च कर्मेन्द्रियाणि, पञ्च बुद्धीन्द्रियाणि च मिलित्वैव। अर्थास्तु शब्दादयः पञ्चैव। तदतिरिक्तं तु अष्टधातुकी प्रकृतिरिति। सा तु खादिपञ्चकबुद्ध्यव्यक्ताहङ्काररूपा वर्तते। इत्थं पुरुषस्तु चतुर्विंशतिकः स्मृतः। क्रमेऽस्मिन् पुरुषस्य तु गणनैव न कृता। साङ्ख्यैस्तु पुरुषस्त्वयं पञ्चविंशतितत्त्वमयोऽस्तीत्युच्यते। यथा चरकसंहितायां चतुर्विंशतितत्त्वानां गणना कृता तथैव साङ्ख्यकारिकायां पुरुषवर्णनक्रमे स्पष्टरूपेण पञ्चविंशतितत्त्वानां गणना विहिता, यथा –**

**'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः' (सां.का.3) इति।**

यहाँ मन की पृथक् गणना करके 'दशेन्द्रियाणि' कहा गया है, उसका तात्पर्य पाँच कर्मेन्द्रियाँ और पाँच ज्ञानेन्द्रियाँ–ये दोनों मिलकर ही हैं। 'अर्थ' शब्द से तात्पर्य शब्द आदि पाँच विषय ही हैं। इसके अतिरिक्त जो 'अष्टधातुकी प्रकृति' कही गई है, वह पाँच महाभूत, बुद्धि, अव्यक्त (प्रकृति) और अहंकार–इन आठ से युक्त होती है। इस प्रकार पुरुष चतुर्विंशति तत्त्वों से युक्त माना गया है। इस क्रम में पुरुष की गणना नहीं की गई है। परन्तु सांख्यमतानुसार यह पुरुष पञ्चविंशति तत्त्वों से युक्त कहा गया है। जैसे चरकसंहिता में चतुर्विंशति तत्त्वों की गणना की गई है, उसी प्रकार सांख्यकारिका में पुरुष के वर्णन के क्रम में स्पष्ट रूप से पञ्चविंशति तत्त्वों की गणना की गई है, जैसे– 'मूलप्रकृति अविकृति है, महत्तत्त्व आदि सात तत्त्व प्रकृति और विकृति दोनों हैं। षोडश (16) तत्त्व केवल विकार हैं। पुरुष न तो प्रकृति है और न ही विकृति।' (सांख्यकारिका 3)

**अत्र समन्वयं करोति व्याख्याकारश्चक्रपाणिः, स कथयति यत् – प्रकृतिव्यतिरिक्तं चोदासीनं पुरुषमव्यक्तत्वसाधर्म्यादव्यक्तायां प्रकृतावेव प्रक्षिप्य अव्यक्तशब्देनैव गृह्णाति; तेन 'चतुर्विंशतिकः पुरुषः' इत्यविरुद्धम्। (च.शा.**

1/17, चक्रपाणि: )

यहाँ व्याख्याकार चक्रपाणि समन्वय करते हैं, वे कहते हैं कि– प्रकृति से भिन्न, उदासीन पुरुष को अव्यक्त के समान होने के कारण अव्यक्त प्रकृति में ही समाहित करके 'अव्यक्त' शब्द से ही ग्रहण किया गया है; इस प्रकार 'चतुर्विंशति तत्त्वों से युक्त पुरुष' कहना अविरुद्ध (विरोधरहित) है। (चरकसंहिता, शारीरस्थान 1/17, चक्रपाणि)

**चतुर्विंशतितत्त्वात्मकेऽस्मिन् शरीरे यानि दशेन्द्रियाणि परिगणितानि तानि तु नियतरूपेण स्वं स्वमर्थं गृह्णन्ति। किन्त्वत्रार्थग्रहणे स्वतन्त्ररूपेण तेषां सामर्थ्यं न विद्यते, अर्थग्रहणे तु समनस्कान्येवेन्द्रियाणि समर्थानि भवन्ति। तत्रेन्द्रियाणां समनस्कानामनुपतप्तानामनुपतापाय प्रकृतिभावे प्रयतितव्यमेभिर्हेतुभि:; तद्यथा- सात्म्येन्द्रियार्थसंयोगेन बुद्ध्या सम्यगवेक्ष्यावेक्ष्य कर्मणां सम्यक् प्रतिपादनेन, देशकालात्मगुण-विपरीतोपासनेन चेति।**

चतुर्विंशति तत्त्वों से युक्त इस शरीर में जो दश इन्द्रियाँ गिनी गई हैं, वे प्रत्येक नियत रूप से अपने-अपने विषय को ही ग्रहण करती हैं। किन्तु इन इन्द्रियों में विषयग्रहण करने की स्वतंत्र सामर्थ्य नहीं होती; विषयों को ग्रहण करने में वे केवल मन से युक्त होने पर ही समर्थ होती हैं। अत: इन्द्रियाँ यदि मन से युक्त हों और विकाररहित हों, तभी वे विषयों को विकाररहित रूप में ग्रहण करने में समर्थ होती हैं– ऐसी स्थिति प्राप्त करने के लिए निम्न उपायों से प्रयत्न करना चाहिए; जैसे – इन्द्रियों के लिए अनुकूल विषयों से उचित संयोग (सात्म्येन्द्रियार्थसंयोग) करने से, बुद्धि द्वारा उचित रूप में विचार कर के (देख- देख कर) कर्मों का यथोचित निर्वहन करने से (स्वस्थ रहने का प्रयत्न करना चाहिए) तथा देशगुण, कालगुण और आत्मगुणों (शरीर की प्रकृति के गुणों) से विपरीत आचरण (आहार-विहार संबंधी व्यवहार) का परिपालन करने के द्वारा (इन सभी इंद्रियों को स्वाभाविकरूप में व्यवस्थित रखने के लिए ये सभी प्रयत्न करने चाहिएँ)।

**इन्द्रियेणेन्द्रियार्थो हि समनस्केन गृह्यते, एकस्मिन् समये त्वर्थस्य चैकस्यैवैकमेवेन्द्रियं स्वमर्थं गृह्णाति, आचार्यश्चरक: कथयति यत् –**

**स्वार्थेन्द्रियार्थसङ्कल्पव्यभिचरणाच्चानेकमेकस्मिन् पुरुषे सत्त्वं, रजस्तम: सत्त्वगुणयोगाच्च; न चानेकत्वं, नह्येकं ह्येककालमनेकेषु प्रवर्तते; तस्मान्नैककाला सर्वेन्द्रियप्रवृत्ति:।। ( च.सू.8/5 )**

मन से युक्त इन्द्रिय से ही इन्द्रियार्थ का ग्रहण किया जाता है। एक ही समय में कोई एक ही इन्द्रिय केवल अपने ही विषय को ग्रहण करती है। आचार्य चरक कहते हैं कि– मन के स्वयं के अर्थों (चिन्त्य, विचार्य, ऊह्य आदि अर्थों) में गमन करने से, इन्द्रियों का अपने-अपने विषयों में( इंद्रियाँ जब अपने-अपने अर्थ को ग्रहण करती हैं तो मन का उनके साथ) गमन करने से एवं विभिन्न प्रकार के संकल्पों में गमन करने से तथा सत्त्व, रजस्, तमस् – इन तीन गुणों के (मन के साथ) संयोग के कारण एक ही पुरुष में सत्त्व (मन) की अनेकता दिखाई देती है। परन्तु वास्तव में वह अनेक नहीं होता, क्योंकि एक मन एक ही समय में अनेक विषयों में प्रवृत्त नहीं होता; अत: एक ही समय में सभी इन्द्रियाँ सक्रिय नहीं होती।' (चरक संहिता, सूत्रस्थान 8/5)

**मनस्तु चञ्चलं वर्तते, भ्रान्तं हि तत्कदाचिद हितानामप्यर्थानां ग्रहणं करोति तेन हि हानिर्भवतीन्द्रियाणां शरीरस्य च। मनस: चाञ्चल्यन्तु योगेनैव निवार्यते। श्रीमद्भगवद्गीतायां**

**कौन्तेयोऽर्जुनः श्रीकृष्णं प्रति जिज्ञासां प्रकटयति– हे कृष्ण! मनः अत्यन्तं चञ्चलं चित्तं विचालयितुं समर्थं च भवति। एतत् अत्यन्तं दृढं बलवच्चास्ति। तस्य निग्रहः कठिनः। यथा-**

**चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम्।**
**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥'**
**( भगवद्गीता 6.34 )**

मन तो चञ्चल स्वभाव का होता है, यह कभी-कभी भ्रमित होकर अहितकर विषयों का भी ग्रहण कर लेता है, जिससे इन्द्रियों और शरीर-दोनों की हानि होती है। मन की इस चञ्चलता को केवल योग के माध्यम से ही रोका जा सकता है। श्रीमद्भगवद्गीता में कुंतीपुत्र अर्जुन श्रीकृष्ण से यह जिज्ञासा प्रकट करते हैं– हे कृष्ण! यह मन अत्यन्त चञ्चल और चित्त को विचलित करने वाला है। यह अत्यन्त बलवान् और दृढ़ (दुराग्रही) है। इसका निग्रह कठिन है। जैसे– हे कृष्ण! मन तो निःसंदेह चञ्चल, उद्विग्न करने वाला, बलवान् और दृढ़ है। मैं उसका निग्रह वायु के समान अत्यन्त कठिन मानता हूँ। ( श्रीमद्भगवद्गीता 6.34)

**संशयस्यास्य निवारणं कुर्वन् भगवान् श्रीकृष्णः वदति– हे कौन्तेय! एतच्चलं मनः केवलमभ्यासेन वैराग्येण च निगृह्यते। यथा-**

**असंशयं महाबाहो मनो दुर्निग्रहं चलम्।**
**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥**
**( श्रीमद्भगवद्गीता 6.35 )**

इस संशय का निवारण करते हुए भगवान् श्रीकृष्ण कहते हैं– हे कौन्तेय! यह चञ्चल मन निःसंदेह कठिनतापूर्वक वश में आने वाला है, परन्तु अभ्यास और वैराग्य के द्वारा इसे वश में किया जा सकता है। जैसे– निःसंदेह, हे महाबाहो! यह मन चञ्चल और कठिनता से वश में आने योग्य है, किन्तु हे कौन्तेय! यह अभ्यास और वैराग्य से वश में किया जाता है। (श्रीमद्भगवद्गीता 6.35)

**एषः निग्रहः ज्ञानाभ्यासेन, ध्यानयोगाभ्यासेन च सिध्यति। योगेन मनसःवशित्वमुपजायते, यथा-**

**असंयतात्मना योगो दुष्प्राप इति मे मतिः।**
**वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः॥**
**( श्रीमद्भगवद्गीता 6.36 )**

यह निग्रह ज्ञान के अभ्यास और ध्यानयोग के अभ्यास से सिद्ध होता है। योग के माध्यम से मन पर वश प्राप्त होता है, जैसे– जिसका मन संयमित नहीं है, उस मनुष्य के लिए योग सिद्ध करना कठिन है – ऐसा मेरा मत है। किंतु जिसका मन वश में है, और जो प्रयत्नशील है, वह उचित उपाय से योग की प्राप्ति कर सकता है।

**भारते योगस्य इतिहासोऽतीव प्राचीनोऽस्ति। योगस्य परिभाषायाम् उक्तं -**

**'योगश्चित्तवृत्तिनिरोधः।' ( पातञ्जलयोगसूत्रम् 1.2 ) अर्थात् चित्तवृत्तीनां निरोध एव योगः। अयं योगः अष्टविधः परिगणितः। तस्याङ्गानि निम्नप्रकारेण सन्ति -**

1. **यमः - अहिंसा, सत्यम्, अस्तेयम्, ब्रह्मचर्यम्, अपरिग्रहश्च।**
2. **नियमः - शौचम्, सन्तोषः, तपः, स्वाध्यायः, ईश्वरप्रणिधानम्।**
3. **आसनम् - स्थिरसुखं स्थितिप्रदं शरीरस्यानुकूलं च।**
4. **प्राणायामः - श्वासप्रश्वासयोः नियमनम्।**
5. **प्रत्याहारः - इन्द्रियाणां विषयविमुखता।**
6. **धारणा - मनसः एकत्रस्थापनम्।**
7. **ध्यानम् - निरन्तरं मनसः एकस्मिन्विषये प्रवाहः।**
8. **समाधिः - ध्यानस्य पराकाष्ठा आत्मदर्शनम्।**

**क. समाधिः विषयेभ्यो निवर्त्यात्मनि मनसो नियमनम्।।( च.सू. 1/58, चक्रपाणिः )**

**ख. विषयेषु प्रसक्तिं मनसो वारयित्वाऽऽत्मनि समाधानं मनः समाधिः। ( च.सू.11/33, चक्रपाणिः )**

**स. योगिनः समाधिबलात्तिरोहितमपि पश्यन्तीति दर्शयति। ( च.शा.1/80-81 चक्रपाणिः )**

भारत में योग का इतिहास अत्यंत प्राचीन है। योग की परिभाषा में कहा गया है कि – चित्त की वृत्तियों का निरोध ही योग है। यह योग आठ प्रकारका गिना गयाहै। उसके अंग निम्न प्रकार से हैं –

1. **यम** – अहिंसा, सत्य, अस्तेय, ब्रह्मचर्य, अपरिग्रह
2. **नियम** – शौच, संतोष, तप, स्वाध्याय, ईश्वर-प्रणिधान
3. **आसन** – स्थिर, सुखद, स्थायित्व प्रदान करने वाला और शरीर के अनुकूल
4. **प्राणायाम** – श्वास और प्रश्वास का नियंत्रण
5. **प्रत्याहार** – इन्द्रियों को विषयों से विमुख करना
6. **धारणा** – मन को एक ही स्थान पर स्थिर करना
7. **ध्यान** – मन का किसी एक विषय पर निरंतर प्रवाह
8. **समाधि** – ध्यान की पराकाष्ठा, आत्मा का दर्शन

क. समाधि – विषयों से हटाकर मन को आत्मा में स्थिर करने का नाम समाधि है। (चरक संहिता, सूत्रस्थान 1/58, चक्रपाणि)

ख. विषयों में लिप्त मन को हटाकर आत्मा में मन का स्थापन करना ही समाधि है। (चरक संहिता, सूत्रस्थान 11/33, चक्रपाणि)

ग. योगीजन समाधि की शक्ति से अदृश्य को भी देख सकते हैं, ऐसा दिखाया गया है। (चरक संहिता, शारीरस्थान 1/80-81, चक्रपाणि)

**वर्तमाने काले भारतवर्षे योगे जनानां रुचिः शनैः शनैर्वर्धते। भारतसर्वकारस्य प्रयत्नेन 21 जून तिथिः 'अन्तरराष्ट्रीययोगदिवसः' इति रूपेण घोषितः। अस्मिन् दिवसे समग्रे जगति जनाः योगे जागरूकतां प्रकटयन्ति। यद्यप्यधुनाधिसंख्यकाः जनाः विभिन्नेष्वासनप्रकारेषु प्राणायामे च मुख्यतयाऽभ्यासं कुर्वन्ति, तथापि केचन योगाभ्यासिनोऽष्टाङ्गयोगेऽप्युत्सुकतां दर्शयन्ति, तस्याभ्यासमपि च कुर्वन्ति।**

वर्तमान समय में भारतवर्ष में योग के प्रति लोगों की रुचि धीरे-धीरे बढ़ रही है। भारत सरकार के प्रयास से 21 जून की तिथि को 'अंतरराष्ट्रीय योगदिवस' के रूप में घोषित किया गया है। इस दिन सम्पूर्ण विश्व के लोग योग के प्रति जागरूकता प्रकट करते हैं। यद्यपि आजकल अनेक लोग विभिन्न प्रकार के आसन और प्राणायाम का मुख्यतः अभ्यास करते हैं, तथापि कुछ योगाभ्यासी अष्टांगयोग में भी उत्सुकता दिखाते हैं और उसका अभ्यास भी करते हैं।

**अयं योगः न केवलं मनःसंयमनार्थमपितु शरीरस्य स्थैर्यार्थं, आरोग्यार्थञ्चोत्कृष्टं साधनमस्ति। तस्मादात्महितं चिकीर्षता सर्वदा स्मृतिमास्थाय योगमनुष्ठेयम् ।**

यह योग केवल मन के संयम के लिए ही नहीं, बल्कि शरीर की स्थिरता और स्वास्थ्य के लिए भी उत्तम साधन है। इसलिए जो अपनी भलाई चाहने वाला है, उसे सदा अपनी स्मरणशक्ति को ठीक रख कर (सावधानी रखते हुये योग के स्वरूप का स्मरण कर के) योग का अनुष्ठान (निष्पादन, अभ्यास) करना चाहिये।

# केन्द्रीयसंस्कृतविश्वविद्यालयः

(संसदः अधिनियमेन स्थापितः)
56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली – 110058
दूरभाषसङ्ख्या – 011 -28524993, 28524995, 28520979, 28520966
अन्तर्जालपुटम् - www.sanskrit.nic.in


**अधिसूचनायाःसंख्या - के.सं.वि./36014/विज्ञापनम्/एस-I/2025-26/01** दिनाङ्कः 25.03.2025

## संस्कृतसंवर्धनयोजनानां च माध्यमेन वित्तीयसहायताप्रदानार्थं वित्तवर्षे 2025-26 कृते अन्तर्जालमाध्यमेन आवेदनपत्राणाम् आमन्त्रणम्

संस्कृतस्य संवर्धनाय केन्द्रीयसंस्कृतविश्वविद्यालयेन सञ्चाल्यमानाः भारतसर्वकारस्य शिक्षामन्त्रालयस्य अधोलिखिताः केन्द्रीययोजनाः उपलक्ष्य 2025-26 वर्षस्य कृते वित्तीयसहायतायाः प्रदानार्थं नियमानुसारं सर्वकारेतरसंस्थाभिः/ स्वैच्छिकसङ्घटनैः/ संस्थाभिः/ विश्वविद्यालयैः/ प्रकाशकैः/ वैयक्तिकरूपेण/ छात्रद्वारा अन्तर्जालमाध्यमेन आवेदन-पत्राणाम् आमन्त्रणं क्रियते –

| क्र. सङ्ख्या | योजनायाः नाम | अन्तर्जालमाध्यमेन पञ्जीकरणम् | |
|---|---|---|---|
| | | आरम्भतिथिः | अन्तिमतिथिः |
| 1. | **संस्कृतशिक्षणम्** - पारम्परिकसंस्कृतपाठशालासु/ महाविद्यालयेषु/ सर्वकारीयविद्यालयेषु/ प्रतिष्ठितसंस्थासु शिक्षणार्थं संस्कृताध्यापकानाम् अथवा आधुनिकविषयकाध्यापकानां व्यवस्था तथा आवासीयच्छात्रवृत्तिश्च। | | |
| 2. | **सम्मानराशिः** – अभावग्रस्तपरिस्थितिषु वर्तमानानां संस्कृतपण्डितानां कृते वार्षिकवृत्तिः। | | |
| 3. | **संस्कृतसंवर्धनाय कार्यक्रमाः गतिविधयश्च** - विभिन्नसंस्कृतसंवर्धनकार्यक्रमाणाम् आयोजनार्थं वित्तीयसहायता। | | |
| 4. | **संस्कृतपुस्तकानां प्रकाशनं सामूहिकक्रयणं दुर्लभग्रन्थानां पुनर्मुद्रणञ्च** | 01.04.2025 | 30.06.2025* (आवेदनानां सम्पूर्णतया जालपुटम् उद्घाटितं भविष्यति) |
| 5. | **शास्त्रचूडामणिः** - संस्कृताध्यापनशिक्षणार्थं शास्त्रविदुषाम् अथवा सेवानिवृत्तानां संस्कृतविदुषां सेवानाम् उपयोगः। | | |
| 6. | **व्यावसायिकप्रशिक्षणम्** - पञ्जीकृतासु पारम्परिकसंस्कृतसंस्थासु अध्ययनरतानां छात्राणां कृते व्यावसायिकप्रशिक्षणम्। | | |
| 7. | अष्टादशी – संस्कृतसंवर्धनाय अष्टादशी परियोजना(निर्दिष्टक्षेत्रेषु आवेदनानि आमन्त्र्यन्ते)। | | |
| 8. | **छात्रवृत्तिः** - पारम्परिक-आधुनिकधारासु नियमितरूपेण नवमकक्षातः विद्यावारिधिपर्यन्तं संस्कृतम्/ पालिः/ प्राकृतम् अधीयानेभ्यः छात्रेभ्यः छात्रवृत्तिः। | | |

*उपर्युक्तानां सर्वासां योजनानां कृते ऑनलाइन-पोर्टल् सम्पूर्णे वित्तीयवर्षे उद्घाटितं भविष्यति किन्तु उपरि निर्दिष्टं 30.06.2025 दिनाङ्कं यावत् प्राप्तानि आवेदनानि वित्तीयसहायतार्थं सर्वथा आयोज्यमाने अनुदानसमितेः उपवेशने विचारार्थम् उपस्थापयिष्यन्ते। उपर्युक्तदिनाङ्कात् परं प्राप्तानि आवेदनपत्राणि अनुदानसमितेः (अध्यक्षः सदस्याः च) यथानुकूलं, वित्तीयोपलब्धताम् च अनुसृत्य अनुदानसमितेः अग्रिमे उपवेशने विचारार्थं प्रस्तोष्यन्ते तथा एतदपि ज्ञातव्यं यत् निर्दिष्टे वित्तीयवर्षे एव उपलब्धधनराश्यनुगुणं वित्तीयसहायतार्थम् आवेदनानां विचारः करिष्यते।

## अवधातव्याः निर्देशाः

I. उपर्युक्तानां योजनानां कृते आवेदनं केवलम् अन्तर्जालमाध्यमेनैव (Online mode only) स्वीक्रियते। अन्येन माध्यमेन प्राप्तानि आवेदनानि न स्वीक्रियन्ते।

II. योजनायाः दिशानिर्देशानुसारं प्रकाशनसामग्र्यः/ पुस्तकानि/ अनिवार्यपत्राणि सक्षमाधिकारिणा प्रमाणितस्य अन्तर्जाले प्रपूरितस्य आवेदनपत्रस्य प्रतिलिप्या सह पृथक्तया प्रेषणीयानि। आवेदनपत्रस्य अनुलग्नकानां च सर्वपृष्ठेषु आवेदकेन हस्ताक्षरम् अवश्यं विधेयम्। सर्वेषां पत्राणां स्वप्रमाणनम् अनिवार्यम्।

III. पूर्णरूपेण प्रपूरितस्य आवेदनपत्रस्य छायाप्रतिः पञ्जीकरणस्य अन्तिमतिथेः 20 दिवसाभ्यन्तरे "निदेशकः (केन्द्रीययोजनाः), (....योजनायाः नाम....), केन्द्रीयसंस्कृतविश्वविद्यालयः, 56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली -110058" इति अनिवार्यतया प्राप्ता भवेत्।

IV. आवेदनपत्रस्य प्रपूरणात् प्राक् योजनानां दिशानिर्देशाः अवश्यं पठनीयाः।

V. प्रत्येकं योजनायाः दिशानिर्देशाः, आवश्यकपत्राणि, मानदेयराशिः, अन्तर्जालमाध्यमेन आवेदनप्रक्रिया, आवेदनपत्रस्य प्रेषणप्रक्रिया इत्यादीनां विषये विस्तृतज्ञानार्थं केन्द्रीयसंस्कृतविश्वविद्यालयस्य अन्तर्जालपुटम् www.sanskrit.nic.in/schemes अवलोकयन्तु।

VI. उपर्युक्तासु प्रत्येकं योजनायाः अन्तर्गततया वित्तीयसहायतां प्राप्तुं प्रतिवर्षं पृथक् रूपेण आवेदनं कर्तव्यम्। योजनायाः नियमानुसारं विगतवर्षेषु प्राप्तानाम् आवेदनानां स्वतः नवीनीकरणं न सम्भवति।

VII. आवेदनानां स्वीकृतिः अथवा तिरस्कृतिः धनस्य उपलब्धताम् आधारीकरोति। अतः प्रत्येकं योजनायाः अन्तर्गततया वित्तीयसहायतायाः निमित्तं पृथक्तया आवेदनं समर्पणीयं भवति।

VIII. कस्याः अपि योजनायाः विषये स्पष्टीकरणार्थम् अथवा समस्यानिवारणार्थम् उपरि प्रदत्तदूरभाषसङ्ख्यया अथवा पत्राचारसङ्केतद्वारा उत ई-मेल help.schemes@csu.co.in माध्यमेनवा सम्पर्कयितुं शक्नुवन्ति।


हस्ता:-
कुलसचिवः ।



श्री नरेन्द्र मोदी
कृषक कल्याण को समर्पित सरकार
श्री भजनलाल शर्मा
अन्नदाता को दिया सम्बल
राजस्थान कृषक समर्थन योजना के तहत
रबी विपणन सीजन 2025-26 में
गेहूँ के समर्थन मूल्य ₹ 2425
पर अतिरिक्त बोनस ₹ 150
कुल 2575/- रुपये प्रति क्विंटल
टोल फ्री नंबर
1800-180-6030
14435
गेहूं के विक्रय हेतु
घर / ई-मित्र से ऑनलाइन पंजीयन की सुविधा
10 मार्च से 30 जून, 2025 तक खरीद
25 जून, 2025 तक ऑनलाइन पंजीयन
उपज बेचान राशि बैंक खाते में होगी ऑनलाइन जमा
जिस बैंक खाते में भुगतान चाहते हैं उसे जनाधार कार्ड में अपडेट करायें
पंजीयन के लिए वेबसाइट www.mspproc.rajasthan.gov.in
आपणो अग्रणी राजस्थान

प्रेषण-प्रत्येक माह की ५ तारीख आर.एम.एस. ( पी.एस.ओ. ) जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७

डाक पंजीयन
Jaipur City/405/2024-26




स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः प्रोफेसर बनवारीलालगौडः, प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाष: २३६५७२१ पत्रसंकेत:- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाष: ०१४१-२३७९०१४

प्रतिष्ठायाम्,